इत्याचार्य श्रीमन्महाभाष्यट्टारकश्रीमद्विश्वामित्रान्ववायवारीशपरिपूर्णसुधाकरश्रीमच्छ्रीनिवासभट्टविरचिते करणप्रकाशव्याख्याने प्रभासंज्ञे ग्रहयुद्धाधिकरो नाम नवमोऽध्यायः ॥

38

Sl. No : 29486 **कारकनिघण्टुः** **Ms. No : B. 622/6**

Beginning :

आत्मा प्रभावशक्तिश्च पितृचिन्ता रवेः फलम् ।
मनो बुद्धिः प्रसादं च मातृचिन्तां च चन्द्रमाः ॥

भ्राता भृत्यगणो भूमिः भौमेनैव विचिन्तयेत् ।
प्रज्ञा च कर्मविज्ञानं बुधेनैव विचिन्तयेत् ।।

End :

आयुष्यं जीवनोपायं मरणं च शनैश्चरः ।
तटाकारामविश्रामान् राहोर्मातामहं भवेत् ।।
केतोः पितामहश्चिन्ता बहुदानश्च मोक्षदः ।।

Colophon:

इति कारकनिघण्टुः समाप्ता ।।

39

Sl: No: 29498 **कालचक्रम्** **Ms. No: P. 2831/9**

Begininng ;

कालचक्रं प्रवक्ष्यामि संक्षेपाच्छृणु सुव्रते ।
शुभाशुभे मनुष्याणां भूतं भव्यं च चोच्यते ।।
लग्ने वा चन्द्रलग्ने वा प्रश्नकाले यदंशकः ।
तदातिनरपर्यन्तं आयुष्यं परिकथ्यते ।।

End :

स्थाननाशो महाव्याधिशतृपीडाकुलक्षयम् ।
भिक्षाटनमनोदुःखं पारे सूक्ष्मदशाफलम् ।।
ज्वरो मनुदिता वृक्षारोहज्वरो मृतिः (?)
कटाह × शश्च × दशाफलम् ।।

Colophon ;

इति मा × डभैरवीये कालचक्रजातके द्वितीयः पटलः ।।
कालचक्रजातकं समाप्तम् ।।

40

Sl. No: 29501 **कालचक्रम्** **Ms. No: P. 6171/**

Beginning :

कालचक्रं प्रवक्ष्यामि संक्षेपात् शृणु सुव्रते ।
शुभाशुभं मनुष्याणां भूतभव्यं भविष्यति ।।

लग्ने वा चन्द्रलग्ने वा प्रश्नलग्ने नवांशके ।
तदादिनवपर्यन्तं आयुषां परिपठ्यते ॥

End :

गोमावाते सुजमेकः ।
धीजसुतमवगोरकः ॥
नक्षनथा दासे च मवः ।
गोरधी नक्षत्रकरः ॥
गोमाव ते सुजाद्दक्षलनम् ॥
धीकसुतमवगोरकः ॥

Colophon :

इति कालचक्रं समाप्तम् ॥

41

Sl. No : 29509 **कालचक्रम्** Ms. No: P. 8288/2

Beginning

प्रणम्य लोककर्तारं शिवं परमकारणम् ।
खेचरीचक्रमध्यस्थं चतुष्षष्टिकलात्मकम् ॥
क्रीडते भगवान्यस्य अरूपी रूपवानिव ।
तं दृष्ट्वा दिव्ययोगेन्द्रं प्रणिपत्य विराजते ॥
श्रीदेव्युवाच —
अनादिनिधनं गुह्यं करुणाचलवर्जकम् ।
कालचक्रक्रमं चैव परमायुर्विनिर्णयम् ॥

End :

राहुचन्द्रो हि चन्द्राहिदशार्कर्कटकः स्मृतः इति कर्कटस्य ।
सूर्यस्य च मन्दयो नास्ति बुधस्यादि कुजस्याशो द्वादशाब्दमजन्म
नाशनोपापदशयमृत्युकालं विजानीयाच्छान्तिं कुर्या × रुक्मकः ॥

Colophon :

इति मार्कण्डभैरवीये कालचक्रजातके प्रथमः पटलः ॥

42

Sl No ; 29522 **कालचक्रदशासूत्रम्** Ms. No: P. 4553/28

Beginning :

कालचक्रफलं वक्ष्ये स पात् शृणु सुव्रते ।
शुभाशुभमनुष्याणां भूतं भव्यं भविष्यति ॥

End ;

देहयोगे जीमबाधा जीवयोगे महद्भयम् ।
देहजीवसमायोगे मृत्युर्भवति नान्यथा ॥

Colophon :

इति कालचक्रफलम् ॥

43

Sl. No : 29527 **कालचक्रदशासूत्रम्** Ms. No : C. 2642

Beginning :

अथ वक्ष्ये विशेषेण कालचक्रस्य निर्णयः ।
तत्कालचक्रं द्विविधं पूर्वोक्तं च महर्षिभिः ॥
भूचक्रं खेजरं चक्रमिति सर्वत्र सम्मतम् ।
मेषादिमीनपर्यन्तं भूचक्रमिह कल्पितम् ॥

End :

मीनगुरुदशावर्षं केतुभुक्तिः —

भुक्तिक्रम	वर्ष	मास	दिन	घलिग	फल
धनुर्गुरु	१	१	२८	३६	१६
मकरशनि	०	५	१७	२६	३१
कुम्भशनि	०	५	१७	२६	३१
मीनगुरु	१	१	२८	३६	१६

Colophon :

— — — —

44

Sl. No: 29530 कालचक्रदशासूत्रम् Ms. No: P. 7514/18

Beginning :

× × त्तोदरव्याधिज्वरस्फोटव्रणं तथा ।
अक्षिरोगं शिरोरोगं सूर्यचक्रदशाफलम् ॥
× × कृष्णलाभं च क्षेत्रलाभं धनागमम् ।
पुत्रलाभं विवाहंच चन्द्रचक्रफलं तथा ॥

End :

मकरमिथुने जीवो स्वयं देह उच्यते ।
तत्तु —
मिथुनस्य हरिं याते पुत्रव्याधिमृतिर्भवेत् ॥
तत्तु —
सिंहस्य कर्कटे याते वधो भवति दे × ।
तत्तु —
कर्कणि कन्यकां याते स्वस्त्रीबन्धुमृतिर्भवेत् ।
तत्तु —
वृश्चिकस्य झ × + ते ज्वरो भवति देहिनाम् ॥
× × यं जीवो मेषे देह इति स्मृतः ॥

Colophon:

कालचक्रदशासूत्रं समाप्तम् ॥

45

Sl, No: 29545 कालदशाफलम् Ms. No: P. 7457/1

Begininng :

अथातःसम्प्रवक्ष्यामि मात्रा ये ब्रह्मयामले ।
मात्रादिभिन्न भेदानां स्वराणां षोडशोदयम ॥
मातृकाया पुरा प्रोक्तस्वराः षोडश संख्यया ।
तेषां × मौत्माज्ञो चत्वरश्च नपुंसकाः ॥

तद्धि × गतनाडीभिः भक्ताशेषं मद्दतांध्रि ।
एष घटिकाहतायुषो बाणचन्द्रविहिताः स्युः समाः ।
स्व स्ववर्षनिहिताः स्वकीयजाः तत्र जातपुरुषस्य तद्भवेत् ॥

Colophon :

इति दशाफलं समाप्तम् ॥

46

Sl. No : 29547 **कालनिर्णयः** **Ms. No : P. 5040/2**

Beginning :

श्रीकण्ठो वृषभाचलस्थितिरलंकालस्तमोनुज्जग-
त्प्राणानन्तधरापनेष्टविलसन्मूर्तिश्चतुर्वर्गदः ।
कालं कालविभागमागमविधिं सृष्टिं च धत्ते स्म यः
पायात्तस्य सुदर्शनं स्मृतिपरानानन्दयच्छाश्वतम् ॥

End ;

ग्रन्थान्तरे—
ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमार्कचन्द्रयोः ।
मण्डले मुच्यमाने तु दानं मु × तु मज्जनम् ॥

Colopon :

इति श्री देवराजभट्टोपाध्याय सोमयाजिपुत्र निट्टूरी बसवाभट्ट विरचिते सुदर्शनाख्ये कालनिर्णये प्रकीर्णकाख्यं चतुर्थप्रकरणम् । इति सुदर्शन कालनिर्णयः ॥

47

Sl. No : 29554 **कालनिर्णयः** **Ms. No : C. 4041**

Beginning :

वागीशाद्याः सुमनसः सर्वर्थानामुपक्रमे ।
यन्नत्वा कृतकृत्यास्स्युः तन्नमामि गजाननम् ॥ +
व्याख्यायन्माधवाचार्यो धर्मान्पाराशरानथ ।
तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः ॥

चन्द्रसूर्यग्रहे चैव न कुर्यात् पुत्रवान् गृही ।

इति । ग्रस्तास्तमये तु पुत्रिणोऽप्युपवास एव । अहोरात्रं नभो रू ×
मिति भोजनप्रतिषेधात् ।।

Colophon :

इति श्री माधवींये कालनिर्णये नक्षत्रप्रकरणे ग्रहणनिर्णयः समाप्तः ।।

48

Sl· No : 29557 **कालनिर्णयदिपिका** Ms. No : C. 178/1

Beginning :

— — —

कालचक्रप्रयोक्तारं नत्वा श्रीविठ्ठलं गुरून् ।
धर्मज्ञानार्थमातन्मः कालनिर्णयदीपिकाम् ॥

\+ + + +

यद्यप्यवशात् प्राप्तं स्पष्टतायै क्वचित् क्वचित् ।
प्रपञ्चयते स्वशब्देन मूलग्रन्थानुसार तः ॥

End ;

दुर्बोधग्रन्थसिद्धान्तध्वान्तसंभेदभञ्जिका ।
सुश्लक्ष्णाऽकारि रामार्यैः कालनिर्णयदीपिका ॥

Colophon :

— — — —

49

Sl No 96558 **कालनिर्णयदिपिकाविवरणम्** Ms· No: C. 178/2

Beginning :

श्रीविठ्ठलं श्रुतिशिरःप्रतितप्रभावं + नमामि ।
श्रीरामचन्द्रकृतिना + कालम् ॥
तत्सूनुना समयनिर्णयदीपिकायाः
गाम्भीर्यगर्भपदपद्यगुणान्वितायाः ।

निर्मीयते विवरणं कणशः प्रवीणै
राचूडमूलमवलोक्य विवेचनीयम् ॥

End :

तज्ज्येष्ठभ्रातृपुत्रः परिकलितकलः श्रीगुरो रामचन्द्रात्
काव्यानां येन टीका व्यरचि सकरुणाम्भोनिधिर्ज्ञानसिन्धुः ।
श्रीकृष्णाचार्यसंज्ञो गुरुरयमवतान्मां कृपात्राद्ययस्य
श्रीरामाचार्यसूनुर्विवरणमकरोद्दीपिकाया नृसिंहः ॥

Colophon :

इति श्रीमत्सर्वशास्त्रज्ञ श्रीगोपालगुरुपूज्यपाच्छिष्यश्रीरामचन्द्राचार्य सुतनृसिंहाचार्यकृतं कालनिर्णयदीपिकाविवरणं समाप्तम् ॥
अनेन विधिवत् कुर्यात् विधानं यो विचक्षणः ।
सर्वपापानि नश्यन्ति सर्वाभीष्टं च विन्दति ॥

50

Sl. No: 29560 | कालप्रकाशिका | Ms. No P.1624/1

Beginning :

तप्तहाटकसंकाशं रत्नसिंहासनस्थितम् ।
पद्मया सहितं नित्यं नारयणमहं भजे ॥
श्रीनृसिंह इति ख्यातो ज्योतिश्शास्त्राब्धितारकः ।
संक्षिप्य तेषु सारोऽयं वक्ष्ये कालप्रकाशिकाम् ॥

End :

नारदीयं तथाऽत्रेयं बार्हस्पत्यं तथैव च : ।
अन्यान्यपि विधानानि समालोच्य समतन्तः ॥
तेषु सारं समुद्धृत्य कृता कालप्रकाशिका ॥

Colophon :

इति नृसिहविरचितायां कालप्रकाशिकायां द्विचत्वारिंशोऽध्यायः ॥
कालप्रकाशिका समाप्ता ॥

51

Sl. No: 29371 **कालप्रकाशिका** **Ms. No: B. 586/4**

Beginning :

शुद्धस्फटिकसङ्काशं रम्यसिह्मासने स्थितम् ।
प × × ॥
× सेनान्यं कमले चक्रधारिणम् ।
यद्द + स्ताः प्रयूह्यर यान्ति दूरतः ॥ +
श्रीनृसिह्म इति ख्यातो ज्योतिश्शास्त्राब्धिपारगः ॥
प्राचीना × ना × वीक्ष्य समन्ततः ।
सङ्गृह्य तेषु सारांशं वक्ष्ये कालप्रकाशिकाम् । +
तिथिवारर्क्षयोगांश्च करणं × दिने दिने ॥
जानाति काले पञ्चाङ्गं तस्य पापो × न विद्यते ॥

End :

आयाममृत्युधनलाभमतः प्रसाद-
सङ्ग्रामदूरगतिभुक्तिजयाः क्रमेण ।
इत्यादि दिक्षु सुधियः स्वरभाषितेन
शंसन्त्यगाधशकुनार्णवकर्णधाराः ॥

Colophon :

इति श्रीनृसिह्मसूरिविरचितायां कालप्रकाशिकायां क्षुतादिफलं नाम द्विसप्ततितमोऽध्यायः । कालप्रकाशिका समाप्ता ॥

52

Sl. No : 29589 **कालविधानपद्धतिः** **Ms. No : P. 6112/3**

Beginning :

देवीं नत्वा देशिकं विघ्ननाथं
शैवं विष्णुं दक्षिणामूर्तिमीशम् ।
ऋष्यादींश्चार्यभेष्टान् लिखेऽहं
× त्रिविक्रमः × कालविधानतन्त्रम् ॥
प्रणम्य कालात्मकमेकमक्षयं + +
+ करोम्यहं कालविधानपद्धतिम् ॥

त्रिपुष्करः भुवनानन्दयोगः सप्तषष्टितमः कर्ममुहूर्तदर्शनाब्धौ तु यानि कर्माणि वसन्तिच । शतद्वयतमैः पद्यैः उक्तश्च श्रीरङ्गेश्वरसंनिधौ कृतं ग्रन्थं महत्तरम् ॥

Colophon :

इति त्रिविक्रमविरचिता कालविधानपद्धतिः समाप्ता ॥

53

Sl. No : 29602 **कालविधानपद्धतिः** **Ms. No : P. 10000/5**

Beginning :

नमः शिवाभ्यां सविनयकाभ्यां
जगत्पतिभ्यां भुवनेश्वराभ्याम् ।
नमो गुरुभ्यश्च नवग्रहेभ्यो
नमो वसिष्ठादिमहामुनिभ्यः ॥
प्रणम्य कालात्मक मेकमक्षयं
भवं भवानीसखमिन्दु भूषणम् ।
विदा × मौहूर्तककीर्तिवृद्धये
करोम्यहं कालविधानपद्धतिम् ॥

End :

वसिष्ठगर्ग्यादिमतामृताम्बुधेः
समुद्धृतां कालविधानपद्धतिम् ।
विलोक्य शास्त्रार्थमुशन्ति ये बुधाः
द्विजातयेभ्यः शिवमस्तु भूतले ॥

Colophon :

एवं कालविधानपद्धतिः समाप्ता ॥

54

Sl. No : 29604 **कालविधानपद्धतिः** **Ms. No : P. 10059/14**

Beginning :

श्रियः करारोपितरत्नमुद्रिका
मरीचिबालातपलोहितीकृतम् ।

सतामुपास्यं सुरशेखरीकृतं
करोतु शम्भो हरिपादपङ्कजम् ॥
प्रणम्य कालात्मकमेकमक्षयं
भवं भवानीपतिमिन्दुशेखरम् ।
विदग्धमौहूर्तिककीर्तिवृद्धये
करोम्यहं कालविधानपद्धतिम् ॥

End :

ऋणविमोचनकाल: —
वागीशमन्ददिवसांशकलग्नयुग्मे
रिक्तासु मन्ददिवसे कुलिकोदये च ।
यत्र द्वितीयपदमैत्रमुहूर्तयुक्ते
शस्युद्गमे च ऋणविमोचनमुशन्ति सन्तः ॥
१०८ ॥ १२१ ॥ पूर्वसंख्या ।

Colophon :

इति कालविधानं समाप्तम् ॥

55

Sl. No : 29606 **कालविधानम्** Ms. No : P. 6589/8

Beginning :

शिरः करारोपितरत्नमुद्रिका
मतिरिचबालातपलोहितकृतम् । (?)
सतामुपास्यं सुरशेखरीकृतं
करोतु शम्भो हरिपादपङ्कजम् ॥

End ;

वराहमहात्म्यविदा मनीषिणा
मर्हर्थनन्दर्भवती मनोरमा । (?)
दशाधिकश्लोकशतेन निर्मिता
समाप्यते कालविधानपद्धतिः ॥

Colophon ;

इति श्रीवराहमिहिराचार्यनिर्मिता कालविधानपद्धतिः समाप्ता ॥

56

Sl. No : 29608 **कालविधानपद्धतिव्याख्या** **Ms. No : P. 2541**

Beginning :

करोम्यहं कालविधानपद्धतेः
व्याख्यां शिशूनामपि बोधकारिणीम् ।
वसिष्ठवाचस्पति नारदादिभिः
प्रणीतशास्त्रैः प्रविशुद्धसंशयाम् ॥
प्राणस्य कालात्मकमेकमक्षयं
भवं भवानी सस × भूषणम् ।
वदामि मौहूर्तिककीर्तिवृद्धये
करोम्यहं कालविधानपद्धतिम् ॥
कालात्मकं–कालस्वरूपं—

End :

त्रिविक्रमः कालविधानपद्धतिं
चकार सांवत्सरिकं प्रधानतः ।
वसिष्ठगार्ग्यादि × धैः
समुद्धृतां कालविधानपद्धतिम् ॥
विलोक्य शास्त्रार्थमुदां . . × . .
चिराय तेभ्यः शिवमस्तु भूतले ॥

Colophon ;

इति श्रीधराख्ये कालविधानपद्धतिव्याख्यने तिथिवार × विधिः ॥ समाप्ता ॥

57

Sl No 29621 **कालादर्शः** **Ms. No: P. 2531**

Beginning ।

ब्रह्माण्डयो यद्गशगा युगादि
कालप्रभेदाश्च यदीयभेदाः ।

कात्यायकं सान्तकमूर्तयेऽहं
नित्याय तस्मै विभवानतोऽस्मि ॥

+ + + + +

विश्वेश्वराचार्यपदारविन्दप्रणामविस्तारितवाग्विलासः ।
आदित्यसूरिस्मृतदर्शिकालं विनिर्णे × मन्दवुद्ध्यै ॥
ननु कालः कोपयुज्यते ।

End :

ज्यौतिषाणि च तन्त्राणि वास्तुतन्त्रं समीक्ष्य च ।
न्यायैस्सम्यग्विचार्योऽयं कालादर्शो मया कृतः ॥
अन्यत्र च वचनानां यें मूलं × भन्ति पण्डिताः ।
तेषां प्रेक्ष्या इमे ग्रन्था इति तन्त्रं मयोत्तरम् ॥

Colophon:

इति आदित्यभट्टोपाध्यायस्य कविवल्लभापरनाम्नो गर्गकुलतिलकस्य कृतिः कालादर्शो नाम कालनिर्णयस्समाप्तः ॥

58

Sl. No : 29627 कालामृतम् Ms. No : P. 4409/1

Beginning:

श्रीमद्वेङ्कटनायकं कुलगुरुं नत्वा सदाभीष्टदं
ज्योतिश्शास्त्रपयोनिधिप्रमथनात् सारं समुत्कृष्य तम्र ।
विद्वद्भिश्चमनोहरं मृदुपदं संक्षेपतः संस्फुटं
गर्भाधानमुखं पिपासुसुलभं कालामृतं वच्म्यहम् ॥

End :

सायन्तन्यपरत्र चेन्मृततिथिस्सैवाब्दिके मासिके
सा ग्राह्या द्व्यपराह्नयोर्यदि तदा यत्राधिका सा मता ।
तुल्या चेदुभयापराह्नसमये पूर्वा न चेत्तद्द्वयोः
पूर्वैव त्रिमुहूर्तगास्तसमये नोचेत्परैवोचिता ॥

Colophon :

— — —

59

Sl. No: 29633 **कालामृतम्** **Ms. No: P. 8297/1b**

Beginning :

श्रीमद्वेङ्कटनायकं कुलगुरुं नत्वा सदाभीष्टदं
ज्योतिश्शास्त्रपयोनिधिप्रमथनासारं समुत्कृष्य तम् ।
विद्वद्भिश्श्रमनोहरं मृदुपदं संक्षेपतः संस्फुटं
गर्भाधानमुखं पिपासुसुलभं कालामृतं वच्म्यहम् ॥

End :

कृत्वादौ नवधा स्वनिर्मितगृहक्षेत्रं नवस्वेव त-
द्भागेष्वर्कमुखान्नव प्रतिदिशं संस्थाप्य तत्पद्मसु ।
मर्त्यामर्त्यचतुष्पदाङ्कविगुरु × शेषु कुर्युः क्रमात्
वराणीत्वरावहि राक्षसमरुत् काणादिरव्यादिषु ॥

Colophon :

— — —

60

Sl. No : 29641 **कालामृतम्** **Ms. No : P. 10000/3**

Beginning :

श्रीमद्वेंकटनायकं कुलगुरुं नत्वा सदाभीष्टदं
ज्योतिःशास्त्रपयोनिधिप्रमथ × समुत्कृष्य तम् ।
विद्वद्भिश्श्रमनोहरं मृदुपदं संक्षेपतः × टं
गर्भादानमुखं पिपासुसुलभं कालामृतं वच्म्यहम् ॥

End :

महाणां सत्वादिगुणप्रधानं पञ्चमहाभूतप्रधनानि ।
चन्द्रो भानुगुरू च सत्वर्गणानाश्चन्द्रो भृगौ राजसौ
रोशसूर्यसुतश्च तामसगुणौ ज्ञेयाश्च जन्मादिषु ।
जीवार्कात्मजभूमिपुत्रगजः सौम्यश्चतुभ्यादिसद्
भूतेशास्त्रदलिष्टतांश्च निलयात् ज्ञत्वा शुभं संवदेत् ॥ (?)

Colophon :

कालामृतं समाप्तम् ॥

61

Sl. No : 29643 **कालामृतम्** **Ms. No : P. 10282/1**

Beginning :

श्रीमद्वेङ्कटनायकं कुलगुरुं नत्वा सदा भास्करं
ज्योतिश्शास्त्रपयोनिधिप्रमथनात्सारं समुत्कृष्य तम् ।
विद्वद्भिप्रमनोहरं मृदुपदं संक्षेपतः संस्फुटं
गर्भाधानमुखं पिपासुसुलभं कालामृतं वच्म्यहम् ॥

End :

राकापूर्वदलेऽष्टमीति दिनयोर्विष्टिस्सदा मृत्युदा
नैकादश्यपि मृत्युकृत्परदले विष्टिश्चतुर्थी तयोः ।
सप्तम्यत्र चतुर्दशीति दिनयोः तानौतु पूर्वे तयोः
विष्टिस्स्याद्दशमी तयोः परदले कृष्णे तृतीया सदा ॥

Colophon:

व्ययसंवत्सर श्रावणबहुल १२ बुधवासर + कालामृतव्याख्यानं लिखितं वेंकटनारायणस्य ग्रन्थस्य व्ययनाम संवत्सरस्य आश्विनशुद्ध–२सस्य । ग्रन्थः समाप्तः ॥

62

Sl. No: 29655 **कालामृतटीका** **Ms. No: P. 6441**

Beginning :

श्रीमच्चिन्तलपाटिवंशजलधेः शीतांशुना धीमता
ध्यात्वा विघ्ननिवारणाय हृदये श्रीदक्षिणास्यं गुरुम् ।
टीका ज्यौतिषशास्त्रतत्त्वमखिलं संगृह्य संभाष्यते
श्रीमद्वेङ्कटयज्वना बुधमुदे कालामृतस्योज्ज्वला ॥ +
श्रीमदिति– आदौ श्रीप्रयोगाद्वर्णगणादिशुद्धिरभ्युच्छ्रयश्च । तदुक्तम् ।

End :

इति सर्वत्र सम्बन्धः कन्यागोवृषभयुग्मवृश्चिकधनुषु कन्यावृषभमीनमिथुन वृश्चिकधनुषु एतेषु लग्नेषु तु बीजोप्तिः शुभप्रदा धान्यप्रदत्वादितिशेषः ॥

Colophon :

— — —

63

Sl. No : 29660 **कालामृतव्याख्या** Ms. No: P. 10282/2

Begininng :

कालामृतस्य यत्तत्त्वं नारिकेलफलोपमम् ।
पूज्याः पिबन्त्वस्य सारं ज्योतिषां सरलं वचः ।।

अथ तत्र भगवान् कविः स्वचिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूर्णाय सम्प्रदायलक्षणश्रेयः (?) फलसत्त्वात् आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुख मित्याशिषामन्यतमं (?) अस्य प्रबन्धस्य मुखलक्षणत्वाच्च विशिष्टेष्टदेवता-नमस्कारलक्षणं मङ्गलमादावाचरन् चिकीर्षितं प्रतिजानीते — श्रीमदिति ।।

End :

रात्रौ धटिकानिर्णयमाह – त्यक्त्वा + विष्टिदिनान्याह – राकापूर्वदले + तृतीया सदा ।।

Colophon :

व्ययसंवत्सरस्य श्रवणबहुल १ बुधुवारे कालामृतस्य व्याख्यानं लिखितं वेंङ्कटनारायणेन ग्रन्थस्य व्ययनामसंवत्सरस्य आश्वीजशुद्ध २ दिवसे ग्रन्थः समाप्तः । श्रीवेंकटेश्वरस्वामिने नमः ।।

64

Sl. No : 29661 **कालामृतव्याख्या** Ms. No : P. 4409/2

Beginning ;

कालामृतस्य विवृतिं बापिराजाह्वायः सुधीः ।
करोति बालबोधाय गौतमीतीरसंस्थितः ।।

श्रीमदिति । कुलगुरुं अत एव सदाभीष्टदं श्रीरस्यास्तीति श्रीमान् स चासौ वेङ्कटनायकश्च ज्योतिश्शास्त्रमेव पयोनिधिः तस्य प्रमथनात् सर्वालोच-नाद्यः सारः समागतः तं सारं समुत्कृष्य आनीय विद्वज्जनमनो हरतीति +

End :

उभयोरपि नास्ति चेत् अस्तसमये त्रिमूर्तगा पूर्वा ग्राह्या । अस्तमये पुर्वा
त्रिमुहूर्तगा न चेत् परैवोचिता । एवमेवकारस्य निस्सन्देहार्थं सर्वत्रान्वयः ।

Colophon :

— — —

65

Sl: No: 29674 कुण्डप्रकाशः Ms. No: C. 4585

Begininng :

भास्वन्तं नीलकण्ठं पितरमनुसरन् शङ्करो वक्ति कुण्डं
भू१द्व्य२ब्ध्यं४गा६ष्ट८हस्तंदशशत१०००हवनात्तद्दशघ्नोत्तरे स्यात् ।
हस्तस्यादूर्ध्वबाहुप्रपदगमखिनः पञ्चमौंशो५गुलन्तत्
सिद्धांश२५स्तद्गजांशो८यवउरग८सुवस्तस्य यूकाष्ट ८ लिक्षा ॥

End :

इष्टव्या समितैर्भुजैः समचतुष्कोणं विधायांकयेत्
कर्याधिर्धेऽमुखे स तोयमदिशि श्रोत्रेऽप्युदक्चांसतः ।
मूलादद्व्यादिगुणौ फले वदनतः पार्श्वार्धपुछे सतः
पार्श्वार्धिमुखे कटौ द्विगुणिते कर्णाच्च पार्श्वे दले ॥

Colophon:

— — —

66

Sl. No: 29675 कुण्डप्रकाशव्याख्या Ms. No: C. 4595/14

Beginning :

कृष्णात्रिगोत्रोद्भवबूबसिन्धोः
समुद्धतो विठ्ठलपूर्णचन्द्रः ।
तस्यात्मजश्रीरघुवीरविज्ञः
करोति कुण्डार्कमरीचिमालाम् ॥

अत्र भगवान् श्री नीलकण्ठभट्टसुतो भट्टशङ्करनामा विद्वान् उपपत्तिप्रधानं सुकरोपायं च कुण्डप्रकाशकं ग्रन्थमाविष्कर्तुं प्रतिजानीते ॥

End :

अनेन प्रकारेण मितिप्रमाणां भट्टशङ्करनामा श्रीबट्टनीलकण्ठसुतोऽवदत् ॥

न परैरवगाहिता पुरः
स्फुटकुण्डा किल शाकटीकृतिः ।
विवृता रघुवीरदीक्षितैः
कुतुकादेव न कामकाम्यया ॥

Colophon :

इति श्रीमत्त्रिस्कन्धज्योतिषांभोधिकुलोद्भवस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्दैवज्ञ-विठलतदीक्षिसूरिसूनोः श्रीरघुवीरदीक्षितस्य कृतिः कुण्डार्कमरीचिमालाख्या समाप्ता ॥

67

Sl. No: 29678 **कुन्तचक्रम्** **Ms. No: P. 6761/19**

Beginning:

कुन्ताकारं लिखेच्चक्रं अक्षदण्डौ च मूलके ।
दिनभादिसमारभ्य कर्तव्यं नवकत्रयम् ॥

End :

राज्यं च भवते यत्र तत्र वक्ष्ये शुभाशुभम् ।
तीक्ष्णे मृत्युर्जयो दण्डे शेषभेषु समं रणे ॥

Colophon :

इति कुन्तचक्रं समाप्तम् ॥

68

Sl. No: 29679 **कुन्तचक्रव्याख्या** **Ms. No : P. 6761/20**

Beginning :

कुन्ताग्रे चन्द्रस्थितनक्षत्रादीनि नक्षत्राणि स्थापयेत् ।
कुन्तमध्यदण्डं नवनक्षत्राणि स्थापयेत् ॥

End :

अ– राज्ञां नामनक्षत्रं तीक्ष्णाख्यं कुन्ताग्रस्थितनवनक्षत्रं स्थितं चेत्
युद्धकाले मृत्युः + तीक्ष्णमुष्टिक्षत्रिययुद्धं आयुधाग्रे विषये सति ॥

Colophon :

— — —

69

Sl. No : 29692 **कुट्टाकारशिरोमणिव्याख्या** **Ms. No : B. 596 /1**

Beginning :

कुट्टाकारौ भवतस्साग्रनिरग्राविहादितस्साग्रम् ।
संक्षिप्य दर्शयित्वा ततो निरग्रः प्रदर्श्यते व्यक्तम् ॥
अत्र हरभभाज्यराशी भास्करसिद्धान्तमवलम्ब्य ।
उच्येते दैवज्ञैरार्यभटीये च तौ समारोप्यौ ॥

End :

कुट्टाकारशिरोमणिमिममभ्यस्यति दृढेन यो मनसा ।
तरणेः प्रसादतोऽयं सहसा तान्त्रिकशिरोमणिर्भवति ॥

Colophon :

— — —

70

Sl. No : 29698 **कुट्टाकारशिरोमणिव्याख्या** **Ms. No : P. 597/b**

Beginning :

नत्वा श्रीरमणं गुरूनपि मया प्रोक्तो मुदे धीमताम्
अचार्यार्यभटोक्तकुट्टयुगलीव्याख्याविशेषोऽमुकः ।
कुट्टाकारशिरोमणिः स्फुटपदैरंकैश्च सांकेतिकैः
वाक्यैरप्यनुयोगवृत्तमहितैर्व्याख्यायते विस्तरात् ॥
अथायं देवराजः प्रारिप्सितस्य —

End :

सतरणेरादित्यस्य प्रसादतः सहसा तान्त्रिकशिरोमणिर्भवति ।
तान्त्रिकः ज्ञातसिद्धान्तः ॥
सद्वर्णसूत्रकलिता समवृत्ताऽतुला नवा ।
समर्पिता महालक्ष्मै टीका मुक्तावली मया (शुभा) ॥

Colophon :

इत्यत्रिकुलाभरणस्य स्कन्धत्रयवेदिनः सिद्धान्तवल्लभ इति प्रसिद्धापरनाम्नः वरदराजाचार्यस्य तनयेन देवराजेन (?) विरचितायां कुट्टाकारशिरोमणि टीकायां मिश्रश्रेणिमिश्रकुट्टाकारः तृतियःपरिच्छेदः ॥ समाप्तोऽयं ग्रन्थः ॥

71

Sl. No: 29706 **कूटयुद्धतन्त्रम्** **Ms. No: P. 8827**

Beginning:

अथातः संप्रवक्ष्यामि कूटयुद्धस्य निश्चयम् ।
स्तौकारिः क्रियते यत्र वनसैन्यवाध × ॥
यस्याश्रयबलेनैव राज्यं कुर्वन्तिवग्रहम् ।
चतुरा × यां समस्तैः शत्रुभिः समम् ॥

End :

बाणस्य पूर्वपूर्वस्यां पश्चिमे पतति ध्रुवम् ।
पश्चिमे च यदा पुंखं पूर्तिलोहं भवेत् ध्रुवम् ॥
आग्नेये च स्थले पुङ्खे उत्तरे पतति ध्रुवम् ।
उत्तरे जायते पुङ्खे दक्षिणे पतति ध्रुवम् ॥
नैऋत्ये च यदा पुङ्खे ईशान्ये राहु × ॥

Colophon :

— — —

72

Sl. No: 29716 **केरलचन्द्रिका** **Ms. No: P. 2172/4**

Begininng :

अथादौ सर्वफलपद्धतिं वक्ष्यमाणः यमलजातकमादौ वक्ष्यामि ।
जन्मलग्नात् तृतीयेशश्चन्द्रलग्नाधिपान्वितः ।
राहुकेत्वन्वितो दृष्टो जायते यमलं तथा ॥
विलग्नचन्द्रलग्नेशौ पुरुषौ चेदुभौ यदि ।
पुंयुगं जायते तत्र तावुभौ स्त्रीग्रहौ यदि ॥

End :

शनवाष्टादशघटीलग्ने वै बुधनन्दनः ।
अर्किवारादियामान्त्ये कालः स्याद्राहुनन्दनः ।।
एतेषां तु चतुर्थं वै दिवा कालोद्भवोच्यते ॥
\+ \+ \+ \+
तत्तत्समस्तमलग्नस्य भविष्यन्ति न संशयः ।।

Colophon :

उपग्रहकरणं सम्पूर्णम् ।।

73

Sl. No: 29720 केरळनाडी Ms. No : B. 62

Beginning :

वासुदेवं परब्रह्म नारयणमनामयम् ।
लक्ष्मीसखं नमस्कृत्य वक्ष्येऽहं देवकेरळम् ।
केरळे कश्चिदास्तीकः अच्युतो नाम भूसुरः ।।
बृहस्पतिं समुद्दिश्य स चक्रे तप उत्तमम् ।।

End :

मेषलग्ने प्रजातस्य प्रबलज्ञातिनाशनम् ।
भूसुतस्य दशाकाले दुःखी स्याद्रविजान्तरे ।।
जीवान्तरेऽपमृत्युश्च जीविते दीर्घमायुषः ।
कुन्तलांशे प्रजातस्य प्रत्यक्षं देवकेरळम् ।।

Colophon:

इति प्रथमोभागः ।।

74

Sl. No : 29721 केरळनाडी Ms. No : B. 63

Beginning :

अथातः सम्प्रवक्ष्यामि तत्कालेन्दुपरिस्फुटम् ।
ज्ञानविज्ञानमात्रेण त्रैलोक्यं सचराचरम् ।।
लाभालाभं सुखं दुःखं जीवितं मरणं तथा ।
जयापविजयश्चेति समागमननिश्चयम् ।।

End :

साधनेशदशाकाले गोचरे मकरे शनौ ।
चापराशिगते जीवे तत्काले मृतिमादिशेत् ।।
पुरा ब्राह्मण जन्म स्यात् वर्तमानं तथा भवेत् ।
पश्चाज्जन्मान्तरे मुक्तिः प्रत्यक्षं देवकेरळम् ।।

Colophon:

इति ज्योतिश्शास्त्रे अच्युतगुरुसंवादे विधुनाडीप्रशंसाङ्गं सम्पूर्णम् ।।

75

Sl. No: 29723 **केरळीयम्** **Ms. No: P. 5891**

Beginning :

अत्यन्तवीर्यस्य समानदेह
खेटस्य लग्नांशपतुल्यगात्रः ।
चन्द्रांशकेशस्य समानवर्णं
इत्यादि भेदैर्मुनयो वदन्ति ।।

End :

स्वप्नेवकस्यापि रवेर्दशायां
स्वबन्धुसौम्यं कृषिवित्तलाभम् ।
शुद्धाश्रयाद्गोधनमित्रसौख्यं
विद्याधराः प्रापितराजपूज्यम् ।।

Colopon :

इति केरळीये पञ्चदशोऽध्यायः ।।

76

Sl. No: 29728 **केरळीयजातकम्** **Ms. No : P. 7514/5**

Beginning :

× × पुत्रार्थसम्पदः ।
शुक्राद्विवाहसंपत्तिर्भोगस्थानं च वाहनम् ।
आयुष्यं जीवनोपायं मरणं च शनैश्वरात् ।।
अथ लग्नफलान्युच्यन्ते ।।

End :

पपाक्षेत्रपापसहितो अल्पविद्यो भवति। केन्द्रत्रिकोणेषु शुभसहितेषु विद्यास्थानाधिपे पञ्चमे शुभस्थितश्चेत् विद्याप्रकाशो भवति। सहजभाव फलम् ॥

Colophon :

इति केरलीयजातकफलं संपूर्णम् ॥

77

Sl. No : 29729 केरलीयजातकम् Ms. No : P. 9875/2

Beginning :

केरली–

अथार्कादिग्रहाणां तु वक्ष्याम्यष्टकवर्गकम् ।
वाक्यानि क्रमशो ज्ञात्वा गोचरादिफलं वदेत् ॥

अस्यार्थः– राशिचक्रं लिखित्वा ।

End :

संवादान्निश्चयं भूयः राज्ञामवितथं भवेत् ।
शशी शुभश्च सौम्यो वा गुरुवत्फलमादिशेत् ॥

Colophon:

— — —

78

Sl. No : 29732 केरलीयजातकम् Ms. No : P. 9923/4

Beginning :

सिद्धान्तमौपदिषदं सिद्धान्ते परमेष्ठितः ।
शोणाधरं महाकिञ्चित् वीणाधरमुपास्महे ॥
बुधैर्भावादयः सर्वे ज्ञेयाः सामान्यशास्त्रतः ।
एतच्छास्त्रानुसारेण + हारणम् ॥

End :

प्रदिशेतां व्यत्ययेन विशेषेण शुभाशुभम् ॥
प्रतिलग्नं समारोह्य पूर्वोद्दिष्टाविरोधतः ।
तत्तद्ग्रहस्वरूपाणि क्रमेणैव विवृण्महे ॥

Colophon :

— — —

79

Sl. No : 29733 **केरळीयज्यौतिषव्याख्या** Ms. No : C. 9923/5

Beginning :

बुधैर्भावादयः सर्वे । लग्नादिद्वादशभावाः । आदिशब्देन स्वदशा भुक्तिभागः । केन्द्रत्रिकोणान्युच्यन्ते । सामन्यशास्त्रतः तदुक्तप्रकारेण । ज्ञेयः ॥

End :

तद्दशाभुक्तिप्रयुक्तशुभाशुभफलानि विशेषेण भवन्तीत्यर्थः । तच्च प्रथमोद्दिष्टापेक्षया । तदनन्तरोद्दिष्टा + व्या किञ्चिन्यूनं तदपेक्षया च । तदनन्तरं । × स्वोत्येवं क्रमेणैवेति भावः ॥

Colophon :

— — —

80

Sl. No : 29735 **केरळीयांशनाडी** Ms No: B. 59

Beginning :

कमलांशे स्थिरे लग्ने वृश्चिके लग्ननायके ।
विप्रकाले प्रजातस्य विप्रजन्मा सुभाग्यवान् ॥

End :

द्वितीये कोशविस्तारं अन्यनाडीषु योजयेत् ।
मन्दनाडीफलं ब्रूयात् रहस्यादिति शेषवान् ॥

Colophon :

केरलीयं अंशनाडी फलं समाप्तम् ॥

81

Sl. No: 29739 **कोटाचक्रम्** Ms. No: P. 132/2

Beginning :

अथातः संप्रवक्ष्यामि कोटायुद्धस्य निर्णयम् ।
प्रकारनिर्णयं तत्र पुरसैन्यं पराभवम् ॥
यस्याश्रयं भवेनैव राज्यं कुर्वन्ति भूतले ।
विग्रहं चतुरश्रायां नियमात् शत्रुभिस्सह ॥

End :

अकारादि स्वराः नवाः पञ्चपूर्वाः चतुष्टये ।
मध्यान्तं सव्यमालिख्य अरिस्थाने च खण्डिताः ॥
दुर्गनामस्वरो यस्य बालो वाऽन्तगतोऽपि वा ।
तद्दिने प्रारभेद्युद्धं दुर्गं सिध्यति नान्यथा ॥

Colophon :

इति नरपतिविजयाचार्यकृतौ कोटाचक्रं समाप्तम् ॥

82

Sl. No : 29755 **कोटायुद्धम्** Ms. No : P. 8078/2

Beginning :

अथातः सम्प्रवक्ष्यामि कोटायुद्धस्य निर्णयम् ।
स्तौकरी कुरते यत्र परसैन्यं पराभवम् ॥
यत्ताश्रयबलेनैव राज्यं कुर्वन्ति भूतले ।
विग्रहं चतुराशीयां सीमास्थैः शत्रुभिः सह ॥

End :

कूर्मयामले —

अरतिनृपराशीशो मित्रो वास्तम्भगो यदि ।
पतितं दुर्गमायाति बाह्यगोवकगोयदा ॥
निविष्टः सन्धिहीनः स्यात्तशतस्य निवर्तनम् । आदियामले ॥

Colophon :

— — —

83

Sl No : 29756 कौशलचक्रं Ms. No: P. 9270/1a

Beginning :

अथातस्सम्प्रवक्ष्यामि चक्रशास्त्रेषु गोपितम् ।
द्वन्द्वयुद्धे विशेषेण कौशलं कुशलप्रदम् ॥ +

श्रीदेव्युवाच—

देव सर्वज्ञ लोकेश लोकानां सृष्टिकृत्प्रभो । +
एकाकी समरे मध्ये द्वन्द्वयुद्धे समागमे ॥
दुर्जयं च जयेत्सत्यं तद्बलं वदमे प्रभो ।

श्रीजनार्दन उवाच—

कौशलं तु बलं देवि सर्वशास्त्रस्य पारगम् ।
न तिथिर्न च नक्षत्रं न वारं नैदवं बलम् ॥ (?)

End ;

षष्ठी च तिथिऋक्षान्तौ सप्तम्यां दृष्टिभेदतः ।
अष्टमे ग्रहवेधानां क्रमात्कौशलनिर्णयः ॥

Colophon :

इति विष्णुयामळे महालक्ष्मीविष्णुसंवादे कौशलचक्रमहाधिकारः संपूर्णः ॥ इति विष्णुकौशलचक्रं सम्पूर्णम् ॥

84

Sl. No : 29786 खेटतन्त्रम् Ms. No : A. 692/1

Beginning :

सिन्धुराभमहं वन्दे सुन्दरास्यं शिवात्मकम् ।
उन्दुरुस्यन्दनारूढमिन्दिरावरवन्दितम् ॥
गार्ग्यगोत्रसमुद्भूतो माधवार्यो महामतिः ।
तस्यात्मजो देचनार्यस्सर्वशास्त्रविशारदः ॥

पडङ्गवेदपारज्ञः समस्तागमतन्त्रवित् ।
तस्य सूनुरहं नन्दी ज्योतिश्शास्त्रविचक्षणः ॥
खेटतन्त्रं स्फुटं वक्ष्ये बालज्ञानाय तत्वतः ।
प्राचीनाचारविषयं सूर्यसिद्धान्तसम्मतम् ॥

End :

कमले भक्षयन्को वा निर्हरेल्लोमुखण्डकान् ।
बहुशश्शोधनेऽप्यस्मिन्नायगच्छत्यशुद्धिभिः ॥
स्खलनाशङ्कया को वा स्थाणुर्भवति बुद्धिमान् ।
तत्र तत्र भवन्त्येव हस्तग्राभाः कृपावशाः ॥

Colophon :

इति मध्यमाधिकारः ॥

85

Sl. No : 29787 **खेटतन्त्रव्याख्या** **Ms. No : A. 692/2**

Beginning :

विष्क्सेनस्स नो भूयात् विघ्नसन्दोहदाहकः ।
यस्य ब्रह्मादयो देवाः परिकर्मपरायणाः ॥
\+ \+ \+ \+
चिरं जीवतु कर्णाटभूपालः कृष्णराट्सुधीः ।
यस्यैतादृशसद्ग्रन्थरक्षणे प्रीतीरुत्तमा ॥
विद्वत्काण्डवकृष्णार्यदेवविच्छक्रवर्तिनः ।
सर्वतन्त्रस्वतन्त्रस्य पश्यन्तु गुणिनः कृतिम ॥
स्वोपास्यं सर्वोत्तमत्वेन स्तुवन्नमति सिन्धुरिति —

End :

सर्वेषां मध्यमं प्रोक्तं राहुकेत्वोरिदं स्फुटम् ।
इति पाठो व्यर्थकल्पस्त्यक्तः ।
कर्तव्यग्रन्थाध्यायनामनिर्देशपूर्वकं प्रथमाध्यायसमाप्तिमाह इतीति ॥

Colophon:

— — —

86

Sl. No : 29795 गणकूटम् **Ms No: P. 5657/12**

Beginning ;

न जन्ममासे न च जन्म ऋक्षे
न जन्मचन्द्रे दिनयोस्तथैव ।
चतुर्विधेष्वेव विवाह पुंसां
मत्युर्भवेच्छोभनमङ्गलानाम् ॥
उपनयनविवाहो लग्नचन्द्रप्रशम्ता-
द्रविगुरुभृगुलग्नचन्द्रजाः केन्द्रसंस्थाः ।
भवति शुभमुहूर्तं दिव्य एकादशस्थाः
सकलमुनिसमेतं कोटिदोषं निहन्ति ॥

End:

ब्राह्मणक्षत्रियविशां नैव गोधूलिकोदयम् ।
अन्येषामपि वर्णानां शस्तं गोधूलिकं तथा ॥
× × × बृहस्पतिः ।
उदयांशस्वनाथेन मित्रसौम्येन वा पुनः ॥
प्रेक्षितो वा तथास्तांशो दम्पत्योः पुत्रपौत्रदः ॥

Colophon :

— — —

87

Sl. No: 29802 गणितक्रिया **Ms. No: P. 6087/2**

Beginning :

श्रीसूर्यादि सर्वे ग्रहजातीशगणिताख्यानि ॥
आदिनाथं नमस्कृत्य गुरुनाथं प्रणम्य च ।
वाग्देवीं वन्दनं कृत्वा श्रुत्वा तत्कमलोद्भवम् ॥
पञ्चाहजीवमभ्यर्च्य सम्पूज्य च नवग्रहान् ।
वासुपूज्यगुरुं नत्वा वक्ष्येऽहं गणितक्रियाम् ॥
षष्टिर्विंशतिगणितं व्यपगतसंवत्सरेण संमिश्रम् ।
नवशून्यब्धिसमेतं शकनृपकालं विजानीयात् ॥

End :

तद्गुणालम्वनाड्यः स्युः विनाड्योऽस्मादभिरूपिताः ।
लम्चनाड्यः स्फुटा ज्ञेया प्राक्लेदाद्यास्तु पर्वणि ।
पश्चाच्चेद्योजनीयास्ते मध्यकालग्रहस्य सः ॥
स्पर्शामोक्षस्थितिदेळ + णिलम्बिकेति ।
विमर्दार्देऽपि तत्काललम्चने संस्कृता स्फुटम् ॥

Colophon :

अरे पाते चेत्यालयस्य स्थानिकदेवचंद्रस्य तन्नजेकैयस्य पुत्र पुट्टबोम्मरसस्य लिखित्वा दत्तं शोधितं ज्योतिषग्रन्थः ॥

88

Sl. No: 29805 **गणितभूषणम्** Ms. No: P. 4771/3

Beginning ;

सा साभ्यस्ता नीतिः प्रभावदिगतालवृन्दसंयुक्ता ।
प्राभ्यो नासत्येथा कलियुगगतहायनौघसंख्या स्यात् ॥
कल्यब्दो रविसंगुण्यो मासश्चैत्रादिसंयुतः ।
अतो द्विघ्नः पुनश्चाधो भूपनन्दा प्रवर्जितः ॥

End :

वसशैलेडुविश्वाच्च गुणितात्कलिवासरात् ।
तत्वेन्दुगुणतानेन्दुरामचन्द्रहरात्फलम् ॥
लब्धागताधिमासाः स्युः शेषाः शेषोनहारकाः ।
गुणकारेण यल्लब्धं भूतं स्यात्पातनावधिः ॥

Colophon :

इति गणितज्ञभूषणे प्रतिभागमष्टमाधिकारः समाप्तः ॥

89

Sl. No : 29806 **गणितसङ्ग्रहः** Ms. No : P. 2588/5

Beginning ;

श्रीराघवं नमस्कृत्य सीतालक्ष्मणसंयुतम् ।
बालानां सुखबोधार्थं वक्ष्ये गणितसङ्ग्रहम् ॥

सप्तविंशषष्टिगुणो रुद्रो नः प्रभवादियुक् ।
शकाब्दा नवशैलेन्द्रवह्नियुक्ताः कलेर्गताः ॥
कल्यब्दो रविभिर्गुण्यो मासैश्चैत्रादिर्भियुतः ॥

End :

बिम्बैक्यार्धं तपनशशिनोः पूर्णतर्के विनिघ्ना
क्रान्त्योर्गत्योर्विवरविहृतं पानकालस्य नाड्यः ।
क्रान्त्योर्यस्मिन् भवति समता मध्यकालस्ततो हि
द्विस्थस्थाभिर्विरहितयुतस्पर्शमोक्षौ भवेताम् ॥

Colophon :

इति गणितसंग्रहे पाताधिकारो नाम चतुर्थोऽध्यायः ॥

90

Sl. No : 29807 **गणितसारः** **Ms. No : P. 4771/6**

Beginning :

इभाननं भक्तभयापहारिणं
त्रिलोचनानन्दकरं सुरेश्वरम् ।
उमासुतं वेदनिधिं गणा धिपं
नमामि नित्यं वरदं गुहाग्रजम् ॥
प्रणम्य भानुं शशिजं महीजं
सौम्यं गुरुं भार्गवमर्कपुत्रम् ।
सर्पाधिराजं शिखिनं च नित्यं
वक्ष्यामि साधुं गणितस्य साधुः ॥

End

एवमस्तोदयार्क्षो यद्दैवज्ञैः प्रोच्यते भृशम् ।
अतीतागतयोर्योगयुधवत् साधयेदिह ॥
अगस्मास्तोदयार्कांशाः, सानेनासिन्धुभागका ।
दानघ्नविषुवच्छाया हीना युक्ताः स्वदेशजाः ॥

Colophon :

इति गणितसारे उदयास्तमयः सप्तमः ॥

91

Sl: No: 29809 **गणितसारसङ्ग्रहः** Ms. No: A. 85

Begininng :

अलङ्घ्यं त्रिजगत्पारं यस्यानंतचतुष्टयम् ।
नमस्तस्मै जिनेन्द्राय महावीराय तायिने ॥
संख्याज्ञानप्रदीपेन जैनेन्द्रेण महात्विषा ।
प्रकाशितं जगत्सर्वं मेनकं प्रणमाम्यहम् ॥
पुरश्च गत्वान्यो योजनासीतिवः ततः ॥

End :

तदग्रस्य प्रदृश्यन्ते दीपं रात्रोपुरे स्थिताः ॥
पुरमध्यस्थशैलस्य + पद्मयापूर्वागमूल्युक् ।
अस्य शैलस्य वेदः को गणकाशु प्रकथ्यताम् ॥

Colophon :

इति सारसङ्ग्रहे गणितशास्त्रे महावीराचर्यस्य कृतौ छायाव्यवहारं नाम अष्टमगणितं समाप्तम् ॥

92

Sl. No: 29859 **गुरुनाडी** Ms. No: B. 356

Beginning:

वासुदेवं परं ब्रह्म नारायणमनामयम् ।
लक्ष्मीसखं नमस्कृत्वा वक्ष्येऽहं देवकेरलम् ॥
केरले विषये कश्चित् अच्युतो नाम भूसुरः ।
बृहस्पतिं समुद्दिश्य स चक्रे तप उत्तमम् ॥

End :

मैत्रे मित्रसमागमं नृपकुलात् संमाननं भूषणं
यानारोहणदेवकर्मनिरतं शय्यासुखासिं वदेत् ।
अत्यन्तं परमित्रभे नृपरतिं सद्गोष्ठिविद्यारतिं
राजाज्ञापरिपालनं सुतसुहृद्बन्ध्वागमं कोशलम् ॥
अन्त्यर्क्षे परमित्रभे च वृषली —

Colophon :

— — —

93

Sl: No: 29860 गुरुपरहितम् Ms. No: P. 2057/12

Begininng :

श्रीमद्दामोदरगुरोः पदपङ्कजरेणवः ।
निर्मलं हृदयादर्शं कुर्वन्तु सततं मम ॥
प्रणम्य प्रणतार्तिघ्नं गणेशानं सुरेडितम् ।
ग्रहाणां गणितं वक्ष्ये दृक्साम्यं स्याद्यथा तथा ॥

End :

परत्र धीगोत्रनृमात्रकेसरी
महेन्द्रदुग्धाग्रधनांशहव्यगुः ।
तरङ्गगङ्गाम्वुजलाम्वुकुम्भगो
विभागशोभाङ्गभवाङ्गिलाभगी ॥

Colophon :

इति परहितज्यावाक्यानि समाप्तानि ॥

94

Sl. No: 29929 गोळपादव्याख्या Ms. No: P. 3458

Beginning ;

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ॥ +
त्रिस्कन्धार्थविदा सम्यक् सूर्यदेवेनयज्वना ।
संक्षिप्यार्यभटप्रोक्तसूत्रार्थोऽत्र प्रकाश्यते ॥

End :

भास्कराचार्यकृतभाष्यतन्त्रद्वितीयतद्व्याख्यादिषु परिशीलनं कृत्वा सूत्राभिप्रायाणि निरवशेषा इति ज्ञेयाः इति × ×
इति × विरचितार्यभटप्रकाशः समाप्तः ॥

Colophon;

इति श्रीमच्चन्द्रशेखर चरणलब्धवाग्विभवेन श्रीबालादित्यसुत सूर्याचार्य शिष्येण श्रीधराचार्य × चितार्यभटोक्तगोलपादस्य तात्पर्यव्याख्यानं कृतम् ॥

95

Sl. No: 29930 गोलयन्त्रनिर्णयः Ms. No: P. 1801/3

Begininng :

मध्यरात्रस्थिरीकृतसमयार्कक्रान्त्यन्तरं षष्ट्या सङ्गुण्य स्थिरीकृतार्धरात्रयोः अन्तरघटिकाभिः विभज्य लब्धं रवेः क्रान्तिगतिः ॥

End :

एतत्सिद्धादिमहापुरुषगम्यं तस्मात् गोळभ्रमणं साधने अमृतस्रावयोगेऽपीति भगवता सुलभमार्ग आदौ प्रोक्तः ॥

Colophon :

इति यल्लम्भट्टीये गोलयन्त्राणां स्वयं भ्रमणद्रव्योपयोगविशेषः ॥

96

Sl. No: 29940 गौलिकाध्यायः Ms. No: B. 8773/16

Beginning:

अथातः संप्रवक्ष्यामि गौलिकाध्यायमुत्तमम्
शुभाशुभफलं वक्ष्ये आरोहाद्यवरोहणश्च ॥
कलहं शिरसि स्थाने ब्रह्मस्थाने च मृत्युदः ॥
तत्पूर्वे मातृपीडा च तत्पश्चात् पितृपीडनम् ॥

End :

मन्दे व्याधिः शत्रुपीडा रिक्ता पर्वभयप्रदः ।
एतेषु वर्जतिथयो शेषाः सर्वशुभप्रदाः ॥
इत्येते गौलिकाध्यायं पठित्वा श्रृणुतां नरः ।
सर्वतश्चैव पापघ्नं अर्थं चैव भविष्यति ॥

Colophon :

इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे गौलिकाध्यायः समाप्तः ॥

97

Sl. No: 30015 **ग्रहगणितम्** **Ms. No: P. 5260**

Beginning :

वन्दे चन्द्रकलाविभूषितजटाजूटं जगद्व्यापिनं
वन्द्यं ब्रह्मसुरेशवन्दितपदं मन्दारकल्पद्रुमम् ।
वामाङ्कस्थित + सोमनाथं शिवम् ॥
+ +
तत्पुत्रस्तम्मयार्यो ग्रहगणितमहं भास्कराख्यं करोमि ॥

End :

त्रिस्कन्धं परिदृश्धा मल्लयज्वारथीतरे रखतः । ?
परिघपरिहोन्नाम्बा प्रसादितस्तम्मय्यार्यः स्यात् ॥
श्रुतिशब्दतर्कवेदान्त तार्किकश्च तस्य कृते ग्रहगणितभास्कराख्ये ।
ग्रहायुतिशृङ्गो गतिरष्टमोऽभूत् ॥

Colophon :

शाकिनीपुरविख्यातमल्लयज्वेन्दुसूनुना ।
वेङ्कटांबातनूजेन तम्मय्यार्येण धीमता ॥
भास्कराख्यकृतो ग्रन्थं धरण्यां चिरमेधताम् ॥

98

Sl. No : 30019 **ग्रहगणिततन्त्रप्रकाशः** **Ms. No : P. 4771/2**

Beginning :

नत्वा तां परदेवतां गुरुमतामाकल्पकल्पद्रुमां
कालःत्माङ्कनिवासिनीं कमलक्षोपोऽशादि देवार्चिताम् । (?)
श्रीनाथोऽहमनेकभद्रविषमान् दृष्ट्वा ससिद्धान्तकान्
ज्योतिर्ज्ञानविदान् मनःप्रियकरं तत्र प्रकाशं ब्रुवे ॥

End :

तन्मध्यमं कल्प्यं यथा धनुः स्याल्लिखेत्तदा तद्दिवसे शशाङ्कम् ।
श्री सूर्यसिद्धान्त समानमित्थौ सिद्धान्तसारावलिगृह्यवर्णम् ॥
तन्त्रप्रकाशं स्वगुरोः प्रभावादनन्तदैवज्ञसुतश्चकार ॥

End :

इति श्रीमदनन्तोपाध्यायसुतश्रीनाथाचार्यविरचिते ग्रहगणिततन्त्रप्रकाशे शृङ्गोन्नत्यधिकारोऽष्टमः ।।

99

Sl. No: 30024 **ग्रहचन्द्रिका** **Ms. No: P. 1883/1**

Beginning

रवीन्दुकुजसौम्येज्यसितमन्दविधुन्तुदान् ।
भुक्तिमुक्तिप्रदानेतान् सततं प्रणमाम्यहम् ॥
पद्मानायकपद्मनाभिजनितं पद्मासनं श्रीपतिं
गौरीशं गणनायकं दिनमणिं नत्वा गुरुं भारतीम् ।
वक्ष्यामि ग्रहचन्द्रिकाख्यगणितं सिद्धान्तसाम्यं स्फुटं
श्रीमत्कृष्णयशोविदोऽहममलं ज्योतिर्विदां प्रीतये ॥

End :

नवाद्रिभूरामपरिमितं शाकाब्दयुतं कल्यब्दाः भवन्ति । चन्द्रोच्चस्य १२५ गुरु १२५ शुक्रः १२५ चन्द्रः ५० राहुः २५ ग्रहगुणकाराः उच्चस्य ११ गुरु ९.२ शुक्र ४२ चन्द्र ११ राहु २७ ॥

Colophon :

ग्रहचन्द्रिका समाप्ता । समाप्तश्चायं ग्रन्थः ॥

100

Sl. No : 30032 **ग्रहचेष्टाविधानम्** **Ms. No : P. 823**

Beginning ;

श्रीमन्वराहमिहिरार्यवसिष्ठगार्ग्य
श्रीसिद्धसेनार्यपराशराद्यैः ।
यत्रैषविर्यवशतो भुवि मानवानां
यद्यच्छुभाशुभफलं सकलं प्रविष्टम् ।
तस्मादहं सकलखेचरचेष्टयैव
वक्ष्येऽधुना सकललोकफलं विचित्रम् ॥

End :

तस्मिन् दाये महत्सौख्यं भूपालसदृशो भवेत् ।
शुभांशके शुभं प्रोक्तं पापांशे कष्टमादिशेत् ॥
राहुभौमदशापाकफलं प्रोक्तं मयाऽधुना ॥

Colophon:

इति ग्रहचेष्टाविधानेऽष्टादशोऽध्यायः ॥

101

Sl: No : 30305 **ग्रहचेष्टाविधानम्** **Ms. No: P. 8818/1**

Begininng :

× भोग्यनाथौ विलग्नेशौ दुस्थौ चेद्यदि जन्मनि ।
अर्धं फलं प्रयच्छन्ति ग्रहा मूलत्रिकोणगाः ॥

अत्र यवानाः —

स्वोच्चे मूलत्रिकोणं च कुल चित् स्वर्क्षसंयुतम् ।
तद्भेदात् फलवैषम्यं इति केचिद्वदन्ति हि ॥

End :

केन्द्रत्रिकोणगे वापि शय्यासौख्यं विनिर्दिशेत् ॥
एवं लग्नादिभावानां ग्रहचेष्टानुसारतः ॥
तत्तद्भावफलं प्रोक्तं ज्योतिर्ज्ञानविदां मुदे ।
ग्रहचेष्टाविधाने तु लाभतद्व्ययभावजम् ॥

Colophon :

इति ग्रहचेष्टाविधाने सप्तदशोऽध्यायः । ग्रन्थः समाप्तः ॥

102

Sl. No : 30037 **ग्रहजन्मादिनिर्णयः** **Ms. No: P.5689/11**

Beginning ;

आदिवारेकमासं च मासार्धं च शशी भवेत् ।
भौमे च प्राणपर्यन्तं बुधश्चाष्टदिनं भवेत् ॥
गुरुः पक्षदिनं प्रोक्तं भृगुर्विंशतिमेव च ।
मन्दे च मासपर्यन्तं इति शास्त्रस्य निर्णयः ॥

End :

धर्मकर्मसुतबन्धुलग्नगः
देवपूज्यभृगुसोमजं फलम् ।
लक्षदोपमुपहन्ति निश्चयं
अन्धकारमिव भास्करोदये ॥

Colophon :

— — —

103

Sl. No : 30040 ग्रहजात्यादिनिर्णयः **Ms. No : B. 737/6**

Beginning :

गुरुशुक्रद्विजश्चैव भौमर्कनृपविस्थता । (?)
सौम्ये शशाङ्कवैश्यश्च शनिशूद्र इति स्मृतः ॥ +
भास्कराङ्गारकौ रक्तौ श्वेतौ शुक्रनिशाकरौ ।
गुरुसौम्यौ सदा पीतौ कृष्णौ राहुशनीश्वरौ ॥

End :

चन्द्राष्टमं वा भृगुषष्टमं वा
कुजाष्टमं वा षडतिष्टदोषम् ।
एकोत्तरं विंशतिदोषमुग्रं
निहन्ति मध्याह्नगतैकलग्नम् ॥

Colophon :

— — —

104

Sl. No: 30043 ग्रहणदर्पणम् **Ms. No: B. 1121/6**

Beginning

त्रैलोक्यानन्दकंदाय त्रयीवेधाय तेजसे ।
शाश्वतैश्वर्ययुक्ताय नमश्चामुण्डिकात्मने ॥
अहोरात्रगणाधारमहोविभवशालिनौ ।
पुष्पवन्तौ प्रदद्यातां शरण्यौ शुभसंततिम् ॥

End :

चन्द्रसंवत्सरदिनसमसंख्यासमन्वितैः ।
विचित्रवृत्तैः सरसैः श्लोकैश्च समलङ्कृतः ॥
ग्रन्थः कृतोऽयं ग्रहणदर्पणाख्यो मनोहरः ।
विद्वज्जनप्रमोदाय जीयादाचन्द्रतारकम् ॥

Colophon :

— — —

105

Sl. No : 30064 **ग्रहतन्त्रम्** Ms. No : P. 1137

Beginning :

अथ सूर्यचन्द्रच्छाद्यच्छादकमीमांसा ।
× च्छ्रुतिस्मृतीतिहासज्योतिश्शास्त्रादिषु प्रसिद्धत्वात् राहुरेव चन्द्रसूर्ययो रुभयोरपि छादकः परि × भवत इति प्राप्तम् ॥

End :

प्रत्युत सूर्यस्य चन्द्रः चन्द्रस्य भूच्छायेत्यत्रैवोपपत्तयो बहुधा दर्शिताः ॥
यथासिद्धान्तमेवात्र चन्द्रसूर्योपरागयोः ।
भूच्छाया चन्द्रमाश्चेति निर्णीतौ छादकावुभौ ॥

Colophon :

इति ग्रहणमीमांसा समाप्ता ॥

106

Sl. No : 30066 **ग्रहणमीमांसा** Ms. No : P. 2559/1

Beginning :

श्रीनृसिंहमहं वन्दे गुरुं चिद्व्यक्ततत्पदम् ।
द्विजोत्तमकृतौन्नत्यं दैवज्ञवरभूषणम् ॥
वल्लालतम्मयज्वेन्द्रतनूजेन विपश्चिता ।
सिद्धान्तसार्वभौमेन वेङ्कटाख्येन यज्वना ॥

भारद्वाजमुनिश्रेष्ठवंशदुग्धाम्बुधीन्दुना ।
मयाऽहोबलनाथीयं ग्रहतन्त्रं प्रकाश्यते ॥

End :

व्यस्तं बाहुं क्षिपेत्तत्र विधोः पश्चिममण्डलम् ।
गुरुप्रसादतः स्पष्टं प्रोक्तं वेङ्कटयज्वना ।
भुव्यहोबलनाथीयं जयत्वाचन्द्रतारकम् ॥

Colophon :

इति श्री अहोबलनाथीये चन्द्रशृङ्गोन्नत्यधिकारोऽष्टमः ॥

107

Sl. No : 30068 **ग्रहतन्त्रम्** **Ms. No : P. 2559/2**

Beginning :

श्रियःपतिं विभुं नित्यं सृष्टिस्तित्यन्तकारणम् ।
समस्तजगदाधारं वेङ्कटेशं नमाम्यहं ॥ +
नृसिंहवरजातत्वात् सिह्मादुत्पन्नसिह्मवत् ।
ज्योतिश्शास्त्रज्ञमातङ्गसिह्मोऽभूद्भूभगोळवित् ॥
तत्सुतश्श्रीनृसिह्मोऽहं सूर्यसिद्धान्तसम्मतम् ।
ग्रहतन्त्रं वेङ्कटाद्रिनाथीयाख्यं समारभे ॥

End :

अधिमानश्लोकपतनकालानयनश्लोकः ।

युगाधिमानम्य २५ नि ३३३६कलिद्युदांरे वासरा २५७७ नि २७८२८ म्तस्यगतैष्यशेषात् । युगाधिमासं २५ नि ३३३६ पदिनैर्गतेष्ये ज्ञेयोऽधिमासस्य निपातकालः इति ॥

Colophon :

इति श्रीनृसिह्मसूनुविरचिते श्रीवेङ्कटाद्रिनाथीये ग्रहतन्त्रे अधिमासनिर्णयाधिकारः नवमः ॥

108

Sl. No : 30071 **ग्रहतन्त्रम्** **Ms. No : P. 6829/1**

Beginning :

श्रीमल्लक्ष्मीनृसिंहाङ्घ्रिपद्मयुग्ममरिप्रदम् ।
ब्रह्मानुभवयोगीन्द्रपूज्यं नित्यं नमाम्यहम् ॥
तत्पुत्रः पापतिम्मार्यः सर्वसिद्धान्तसारवित् ।
श्रीमल्लक्ष्मीनृसिंहीयं ग्रहतन्त्रं करोम्यहम् ॥

End

श्रीवेल्लालकुवार्धीन्दुपापतिम्मार्यनिर्मितम् ।
श्रीलक्ष्मीनृसिंहीयं जीयाद्धव्येन्दुतारकम् ॥
श्रीशं सूर्यमतिस्तुत्यं अनिरुद्धपदास्पदम् ॥
सुदर्शनं पाञ्चचन्यं वहन्तं मद्गुरुं भजे ॥

Colophon :

इति लक्ष्मीनृसिंहिये पापतिम्मयधीमता ॥
शृङ्गोन्नत्यधिकारोऽयं अष्टमस्समुदाहृतः ॥

109

Sl. No: 30072 **ग्रहदर्पणः** **Ms. No : P. 4508**

Beginning :

अब्दो मतः खेषु न मैर्धवादि
ज्ञोच्चस्य वीजं हि गुरोस्तदर्धम् ।
तस्याङ्घ्रिहीनो भृगुतुङ्गसौरेः
पातोच्चयोस्तस्य द्वितीयकांशः ॥
आरास्तु षष्ठांशमिदं धनं स्यादारार्कजज्ञस्य ऋणं परेषाम् ॥

End :

केन्द्राधिपेऽपि स्वदशायां त्रिकोणाधिपः ।
केन्द्राधिपतेः भुक्तौ शुभं दिशन्तीत्यर्थः ।
दशानाथ उभयोरपि दोषराहित्येन भवितव्यमिति ज्ञेयम् ॥

Colophon :

— — —

110

Sl. No: 30096 **ग्रहनिघण्टुः** Ms. No : B. 622/3

Beginning :

अदित्योऽर्करविर्भानुः भास्करश्च दिवाकरः ।
मार्ताण्डस्सविता हेळिः तीक्ष्णांशुः मिहिरो रवेः ॥
चन्द्रः शशी शशाङ्कश्च विधुः सोमो निशाकरः ।
शीतांशुरुडुनाथश्च इन्द्रश्चन्द्रमसो विदुः ॥

End :

पातुश्च सैंहिकेयश्च भुजगाख्य इति स्मृतः ।
केतुश्शशी ध्वजो धूमः उत्पातो बहुरूपधृक् ।
शिरोहीनो घोररूपः चित्रवर्णः सुकेतनः ॥

Colophon :

इति ग्रहनिघण्टुः समाप्ता ॥

111

Sl. No: 30116 **ग्रहभावफलम्** Ms. No: P. 4333/2

Beginning

देहाधिपतिः पतिर्न पापः षष्ठाष्टमव्येषु स्थितश्चेत् देहसौख्यं भवति एवमेव फलं सर्वत्र द्वादशभावेषु योजनीयम् न षष्ठपस्तत्र षष्ठ ×
षष्ठाष्टमव्ययेषु स्थितश्चेत् —

End :

अल्पायुश्चरणे स्थितिर्न गमनं देशान्तरे जानुनि
गुह्ये स्यात्परदारलंपटमतिः नाभौ च संतुष्टवान् ।
ऐश्वर्यं हृदि शौर्यमस्य करयोःबाह्वोर्बलं स्कन्धयोः
तद्वक्त्रे च यथेष्टमन्नरसने राज्यं शिरश्चायुषि ॥

Colophon :

— — —

112

Sl. No : 30119 **ग्रहभाष्यम्** **Ms. No : P. 4542/1**

Beginning :

वन्दे सर्वसुरेन्द्रवन्दितजया श्रीपव × ×
वन्दे शङ्करशर्वशाश्वतमहो वन्दे मुनिन्द्रेन्द्रिया ।
वन्दे नागविभीषणौन्नतगुणा श्रीशम्भुसर्वोत्तमा
वन्देहं फलदायकाय विभवानन्दस्तुते भक्तदाः॥
स्कन्दाचार्यमनुक्तनां सर्वशास्त्रानुसारकम् ।
ग्रहाभाष्यं महाशास्त्रं सर्वज्यौतिषसंमतम् ॥

End :

उदरे पञ्चऋक्षाणि एकं नाभिं च नक्षिपेत् ।
एकं गुह्यप्रदेशं च एकैकं जानुजङ्घयोः ॥
शेषऋक्षाणि पादौ च × ।
रविपादस्थितो बालः स जीवति न संशयः ॥

Colophon:

— — —

113

Sl. No: 30123 **ग्रहयुद्धफलम्** **Ms. No : P. 3804/18**

Beginning :

वराहमिहिरः —
दिनकरतनयफणीन्द्राः सह स्थिता एकराशिमुपसंगम्य ।
नृपक्षो (?) णितप्रसिक्तां सकलां वसुधां क्षीणीकुरुते ॥
यदा मन्दाहिस्तदा (?) सस्यविनाशनम् ॥

End :

यस्यासनागता ह्येते तस्य राज्यक्षयंकराः ।
एवं शुभफलं दद्यात् देवमन्त्री न संशयः ॥
करोति विपुलं राज्यं यस्यासनागतो गुरुः ॥

Colophon:

— — —

114

Sl. No: 30130 ग्रहरत्नमालिका Ms. No: A. 837/

Beginning:

आलोड्य हेमाद्रिमयूखयामल-
श्रीतत्त्वनिध्यादिनिबन्धनान्यपि ।
सङ्गृह्य कृष्णक्षितिपालमौलिना
विरच्यतेऽसौ ग्रहरत्नमलिका ॥

End :

अथ केतुप्रत्यधिदेवताचित्रगुप्तध्यानम् ॥
पिङ्गलश्मश्रुकेशक्षं स्वर्णाभं चित्रगुप्तकम् ।
वामे पत्रं करे दक्षे लेखनीं दधतं भजे ॥

Colophon :

इति केतुग्रहाराधनक्रमः सम्पूर्णः ॥

115

Sl. No : 30134 ग्रहलाघवम् Ms. No : P. 2263/1

Beginning :

ज्योतिःप्रबोधजननी परिशोध्य चित्तं
तत्सूक्तकर्मचरणैर्गहनार्थपूर्णे ।
स्वल्पाक्षरापि च तदंशकृतैरुपायै-
र्व्यक्तीकृता जयति केशववाक् श्रुतिश्च ॥
परिभिन्नसमौर्विकेशचापं
दृढगुणहारि लसत्सुवृत्तबाहुम् ।
सुफलप्रदमात्तनृपप्रभं त्वं
स्मर रामं करणा च विष्णुरूपम् ॥

End ;

पूर्वे प्रौढवराः क्वचित् किमपि यच्चक्रुर्धनुर्ज्ये विना
ते तेनैव महातिगर्वकुभृदुच्छृङ्गेऽधिरोहन्ति हि ।
सिद्धान्तोक्तमिहाखिलं लघु कृतं हित्वा धनुर्ज्ये मया
तद्गर्वो मयि नास्तु किन्तु यदहं तच्छास्त्रतो वृद्धधीः ॥

नन्दिग्राम इहावरान्तविषये शिष्यादिगीतस्तुतिः
योऽभूत्कौशिकवंशजस्सकलसच्छास्त्रार्थवित्केशवः ।
सूनुस्तस्य तदङ्घ्रिपद्मभजनाल्लब्धाववबोधांशकः
स्पष्टं वृत्तविचित्रमल्पकरणं चैदद्गणेशोऽकरोत् ॥

Colophon :

ग्रन्थसमाप्त्यलङ्काराध्यायः षोडशः ॥

116

Sl. No : 30141 ग्रहलाघवम् Ms. No : P. 10334

Beginning :

ज्योतिःप्रबोधजनती परिशोध्य चित्तं
ततोक्तकर्मचरणैर्गहनार्थपूर्णा ।
स्वल्पाक्षरापि च दशकृतै रुपायैः
व्यक्तीकृता जयति केनववाक्पतिश्च ॥

End :

नन्दिग्राम इवापनान्तविषये शिष्यादिगींतस्तुति
योंऽभूत्कौशिकगोत्रजः सकलसच्छास्त्रार्थवित्केशवाः ।
सूनुस्तस्य तदङ्घ्रिपद्मभजनाल्लब्धाववबोधांशकः
स्पष्टं वृत्तविचित्रमल्पकरणं चैतद्गणेशोऽकरोत् ॥

Colophon :

इति श्री ग्रहलाघवाख्ये सिद्धान्तरहस्ये गणेशदैवज्ञविरचिते मासगणतिथि पत्रग्रहणाधिकारो नाम पञ्चदशोऽध्यायः ॥

117

Sl. No : 30144 ग्रहलाघवम् Ms. No : C. 4070/1

Beginning :

ज्योतिर्विद्गुरुणा गणेशगुरुणा निर्मथ्य शास्त्राम्बुधिं
यच्चक्रे ग्रहलाघवं विवरणं कुर्वेऽस्य सत्प्रीतये ।
स्मृत्वा शम्भुसुतं दिवाकरसुतःतद्विश्वनाथः कृती
जाग्रज्ज्योतिषगर्वगोकुलपरित्राणाय नारायणः ॥

End :

देयं तच्चरमरूणेर्वि × कासु-
मध्येन्दौ २ द्विगुणनवीद्धृतं कलासु ।
भा २७ सं च घुमनीफलं तथातवेदा
ध्न्यू ४ ४ ४ नः × काः ९,४ कलिका वियोज्याः ॥

Colophon :

इति श्री ग्रहलाघवे सिद्धान्तरहस्ये पञ्चाङ्गनयनग्रहणानुमाधिकारः ॥
शकेष्टाद्रिमनू + लिखितो ग्रन्थराजः ॥

Extra Information :

नागाङ्करसभूशाके (1698) दुर्मुखिनामवत्सरे ।
मासि भाद्रपदे शुक्ले प्रतिपद्यां भृगौ दिवा ॥
मुधोलाग्रमवास्तव्य लक्ष्मभट्टस्य सूनुना ।
रामेण लिखितो ग्रन्थः ग्रहलाघव उत्तमः ॥

118

Sl. No: 30146 ग्रहलाघवम् **Ms. No: P. 8005**

Beginning :

गणेशं गिरं पद्मजन्माच्युतेशान्
ग्रहान् भास्करान् भास्करादींश्च नत्वा ।
लघुप्रक्रियं प्रस्फुटं खेटकर्म
प्रवक्ष्याम्यथ ब्रह्मसिद्धां × म्यम् ॥

End :

ग्रहकालाः सरवीन्दुकलाहृताः
स स्वगजैश्च भायोगमिति क्रमात् ।
अथ हृता खगतैष्यविलिप्तिका
स्वगतिभिश्च गजाप्तगतनाडिकाः ॥

Colophon :

इतीह भास्करोदिते ग्रहागमे कुतूहले विदग्धबुद्धिवल्लभे स्पुटाधिकारः ॥

119

Sl. No : 30148 **ग्रहलाघवव्याख्या** **Ms. No: P. 8846/1**

Begininng :

ज्योतिषबोधजननी परिशोध्य चित्त
तत्सूक्तकर्मचरणैर्नहनाथ पुण्य × ।
स्वल्पाक्षरापि च तदंशक्तैरुपायैः
व्यक्तीकृता जयति केशववाक्पतिश्च ॥

End :

नन्दिग्राम इहापरान्तविष × शिष्यादिगीतं-
ये भुक्तौशिकगोत्रजस्सकलसदास्तोत्रवित्केशवः । (?)
सूनुस्तस्य तदंघ्रिपद्मभजनाल्लब्धावबोधांशुकः
× वृत्तादिचित्रमल्पकरणिं चैतद्गणेशोऽकरोत् ॥

Colophon:

इति सकलागमाचार्यवर्य श्रीकेशव × रात्मजगणेशदैवज्ञविरचिते
ग्रहलाघवा × स्सिद्धान्तरहस्ये पाताधिकारश्चतुर्दशः ॥

120

Sl. No : 30150 **ग्रहलाघवटीका** **Ms. No: P. 2263/2**

Beginning :

नाके नाकेशमुख्यास्सुरवरविनिवहास्सन्ति येऽनन्तसंख्याः
नाख्यामाख्यात्यमीपां कथमपि च मनःपूर्वकं वाङ्मदीया ।
एकं हिवैकदन्तं सततमुगशिरस्सन्धसन्धर्षितांघ्रि
शीघ्रं वक्त्रिष्टसिद्धिप्रदमिह हि सुरं सादरं तं नमामि ॥
मल्लारिं कुलनायकं कविमुखान् खेटांश्च नत्वा गुरोः
स्मृत्वा पादयुगं ह्यवाप्य च ततः किञ्चित्सुबोधांशकम् ।
मल्लारिर्ग्रहलाघवस्य कुरुते टीकां स सद्वासनां
यस्मादल्पमतिस्त्वकुण्ठितमतिःस्यात्पूर्ववैचित्र्यतः ॥

End :

यद् यतः अहं तच्छास्त्रतो वृद्धा धीः तद्ग्रन्थपठनादेव मम वृद्धेत्यर्थः । अथ स्वस्थितिपुरस्वनामादिकं कथयति नन्दिग्राम इति × × स्पष्टार्थमेतत् ।।

Colophon :

इति श्रीमद्गणकचूडामणिगणेशदैवज्ञविरचितस्य ग्रहलाघवस्य श्रीमद्दिवाकर दैवज्ञसुतमल्लारिदैवज्ञविरचितटीका समाप्ता ॥

121

Sl. No : 30153 ग्रहलाघवटीका Ms. No: P. 4432

Beginning :

ज्योतिर्विद्गुरुणा गणेशगुरुणा निर्मथ्य शास्त्राम्बुधिम्
यश्चक्रे गुरुलाघवं विवरणं कुर्वे च तत्प्रीतये ।
स्मृत्वा शम्भुसुतं दिवाकरसुतः तद्विश्वनाथः कृती
जाग्रज्ज्योतिष × परित्राणाय नारायणः ॥

End :

नन्दिग्राम इहापरान्तविषये शिष्योऽतिगीतस्तुति-
र्योऽभूत् कौशिकगोत्रजः सकलवि × र्थधीः केशवः ।
सूनुस्तस्य पदाङ्घ्रिपद्मभजनात् लब्धावबोधांशकं
स्पष्टं × चितमल्पकरणं चैतद्गणेशोऽकरोत् ॥

Colophon:

इति श्री ग्रहलाघवटीकायां पात्राधिकारः चतुर्दशः ॥

122

Sl. No : 30154 ग्रहलाघवटीका Ms No: P. 5163/2

Begininng :

नृसिंहं प्रणिपत्याहं गणेशेन विनिर्मितम् ।
व्याकरोमि यथाबुद्धि निखिलं ग्रहलाघवम् ॥

अथ श्रीमान् केशवदैवज्ञात्मजो गणेशदैवज्ञो ग्रहलाघवाख्यं ग्रहकरणं चिकीर्षुः निर्विघ्नेन ग्रन्थसमाप्तिप्रचयगमनाभ्यां —

End :

तदङ्घ्रिपद्मभजनात् किंचदवबोधांशकं चानल × लब्धवान् इदं करणं स्पष्टं स्पष्टार्थं × नानाछन्दोभिः विचित्रार्थेन × च कृतवान् ।

Colophon :

इति श्री दिवाकरदैवज्ञात्मज विश्वनाथदैवज्ञविरचितायां ग्रहलाघवटीकायां मासगणनात्तिथिग्रहणग्रन्थारम्भपूर्वकालिकग्रहसाधनाधिकारस्समाप्तः ॥

123

Sl. No: 30170 **ग्रहशीघ्रसिन्धुः** **Ms. No: C. 4700/53**

Beginning :

× × लब्धाकोष्ठागतं फलम् ।
एष्यान्तरघ्नतच्छेषं प × नरव २०२५ भजितम् ॥
स्वर्णनाद्यादिना कार्यं कोष्ठस्य प्रस्फुटं भवेत् ॥

End :

स्पष्टयोः सूर्यग्रहयोः रुज्वोर्गत्यन्तरेण च ।
अनुजो श्चेचरा × पि भुक्त्या योगेन संज्ञतात् ॥
गतैष्यश्चैदयो व्य × × स्तत्क्रमेण तु ॥
रसर्तवः श्चन्द्रस्ता २९. यमेशा ॥

Colophon :

इति श्री वैराटस्थानस्याष्टपु × हरिभट्टविरचिते ग्रहशीघ्र सिन्धौ ग्रहस्फुटीकरणं समाप्तम् ॥

124

Sl. No : 30173 **ग्रहसमयः** **Ms. No : P. 1188/3**

Beginning :

व्यघ्रापादमहं वन्दे शेषांशेन समुद्भवम् ।
पुण्डरीकपुरीशस्य पदपङ्कजसंश्रयम् ॥
ऋषयः –
शृण्वन्तु ऋषयः सर्वे दुरूहं सर्वदैवैः
ग्रहाणां समयं व्यग्रः (?) वक्ष्यामि सतिमात्रतः ।

End :

लेखनं राज्यभारश्च व्यवसायं मनःसुखम् ।
अल्पायुः कार्यहानिश्च देशान्तरगतिं तथा ॥
अपमृत्युश्च सल्लापं शनिरङ्कणजं फलम् ॥

Colophon :

— — —

125

Sl. No : 30174 **ग्रहसमुल्लासः** **Ms. No : P. 1798/4**

Beginning :

गौरीकान्तसुतं नमामि सकलाभीष्टार्थसिद्धिप्रदं
श्रीकान्तेश्वरपद्मयोनिसदृशं ज्ञानावबोधं गुरुम् ।
नत्वा बालकबोधने पटुतरं वासिष्ठशास्त्रोपमं
वक्ष्ये विप्रमनोहरं ग्रहसमुल्लासप्रबन्धं शुभम् ॥

End ;

ग्रन्थं ग्रहसमुल्लासं दृष्ट्वा दैवज्ञसत्तमाः ।
स्वपुत्रवद्बालकं मां रक्षन्तु सततं मुदा ॥
अस्मिंश्लोकाः पञ्चविंश्चे १३५ मन्व १४ नुष्टुप्समन्विताः ।
विश्ववृत्तसमायुक्ताः नवाध्याया मया कृताः ॥
गोपालदैवविच्छिष्य नृसिंहेण प्रदर्शितम् ।
ग्रन्थे ग्रहसमुल्लासे पातनैधृतिसाधनम् ॥

Colophon :

इति श्रीमद्गोपालदैवज्ञशिष्य नृसिंहविरचिते ग्रहसमुल्लासे पाताधिकारो नाम नवमोऽध्यायः ॥

126

Sl. No: 30207 **ग्रामसालावली** **Ms. No : P. 9881/10**

Beginning :

न गृहे वृश्चिके पूर्वे धूम्रे मीनजयं गतः ।
कन्यायां दक्षिणे नाशे नैरृत्यां कष्टकर्कटे ॥
वारुणे धनहानिः स्यात् वायव्यां मरणे तुले ॥

End :

ग्रहसंख्या हरेद्भागं तच्छेषं फलमादिशेत् ।
तापः सौख्यमनर्थं च स्नेहवस्त्रादिभूषणम् ॥
मरणं देहपीडां च यधिर्मृत्युस्तथैव च ॥

Colophon :

— — —

127

Sl. No : 30217 **घटिकापञ्चाङ्गम्** **Ms. No : P. 3771/22**

Beginning :

मि × श्रेयादिवाक्येषु × त्र घटिकावाक्यानि
हि या वशो अलजमः नाताग ×
निरवशात् वारमलि नीरगे ते
नैरमणिः जयोत्पत्तिः नानग्रे ते
अरोमणिः नधेर × १० कलत्र ×
× लत् × ज्ञानगतिः का ×
× भस्सनः × न पर्वते नाराय मे नाघसमे

End :

पृथक् पृथक् पादात् पादघटिका । क्षेत्रञ्च यथाक्रमं वाक्यानि योजयेत्
तर्हि स्फुटास्सुघटिका × वारेणघ × थात् × र्य ×
दैवेन्द्रम्य गतिस्स्फुटः ॥

Colophon :

पूर्णानन्दकृतघटिकापञ्चाङ्गं समाप्तम् ॥

128

Sl No: 30265 **चन्द्रनाडी** **Ms. No: B. 61**

Beginning

× जेर्वारे विशाखे मरणं भवति ध्रुवम् ।
पुत्र प्राबल्ययोगं स्यादतिसारेण मृत्युकृत् ॥

पश्चादुत्तमज्येष्ठः स्यात्प्रत्यक्षं भार्गवं मतम् ।
गुरुनाडी फलाध्याये विस्तारेण प्रवक्ष्यते ।।

End :

अष्टसप्तात्परं वक्ष्ये अतिसारश्चिरं मृतिः ।
एवमादिफलं प्रोक्तं प्रत्यक्षं भार्गवं मतम् ।।

Colophon :

चन्द्रनाडीग्रन्थः समाप्तः ।।

129

Sl. No : 30294 चन्द्राभरणहोरा **Ms. No: P. 4511**

Beginning :

आकृति जातिप्रकृति ज्ञात्वा सम्यक् फलानि वक्तव्यम् ।
देश्यं वयो विकल्पं सदानुकर्मैर्यथा यथा न्यायम् ।।

End :

रसातलं मातृगृहमिति केचित् प्रचक्षते ।
अर्केन (?) पितृवर्गं च आत्मवर्गं च उच्यते ।
चन्द्रेण मातृवर्गं च भार्यावर्गं च उच्यते ।।

Colophon:

[शत्रव्यययोगं नाम एकशततमोऽध्यायः]
[इति यवनाचार्यकृतौ चन्द्राभरणहोरायां निर्याणलक्षणं नाम सप्तनवति-रध्यायः] ।।

130

Sl: No : 30299 चमत्कारचिन्तामणिः **Ms. No: P. 7559/13**

Begininng :

लसत्पीताम्बरं कृष्णचन्द्रं
मुदा राधयालिंगितं विद्युतेव ।
घनः संप्रणम्यात्र नारायणाख्यं
चमत्कारचिन्तामणिं सम्प्रवक्ष्ये ।।

End :

चमत्कारचिन्तामणौ यच्च गीतं
फलं कीर्तितं भद्रनारायणाख्येन ।
पठे × द्विजस्तस्य राज्ञां सभायां
समक्षं च वक्तुं न चान्ये समर्थाः ॥

Colophon :

इति चमकारचिन्तामणिः समाप्ता ॥

131

Sl. No : 30307 चिन्तामणिज्योतिषम् **Ms. No: P. 1883/5**

Beginning :

यश्चिन्तामणिरङ्कलेख्य बहुशोऽप्यल्पक्रिये मन्मणिः
तिथ्याद्यावगमप्रभो × सुखिनो यल्लेखने भीरवः ।
तत्प्रीत्यै लघुमल्पकृत्यममलं तिथ्यादिचिन्तामणिं
विघ्नेशार्कमुखान् प्रणम्य कुरुते श्रीमद्गणेशः कृती ॥

End :

पराख्यकोष्ठे ह्युमुखं तु भस्ये
स्वहारहृत्केन्द्रघटीमुखेन ।
सुसंस्कृतं तच्च परिस्फुटं स्यात्
स्वभोगयुक्तं तपनोदयं स्यात् ॥
उल्लङ्घ्जे दिवसमेति ततः पराहं × तिथिपदकम् ×

Colophon :

— — —

132

Sl. No : 30321 चौदन्तिशास्त्रम् **Ms. No : P. 9942/8**

Beginning :

अश्विन्यां लग्न × त्रः सर्वग्रहनिरीक्षितः ।
करोति पृथिवीपालं निर्जितारातिमण्डलम् ॥
शत्रुनीचगृहं त्यक्त्वा कुटुम्बस्थानभार्गवः ॥

End :

नकारमात्रमाग्नेयं याम्यनक्षत्रगोग्रहः ॥
चौदन्तिसंग्रहं चैतद्राय × स्त्यंवपा ।
× कृतं लोकोपकारार्थं मनुमार्यसुतेन च ॥

Colophon:

इति चौदन्तिः समाप्तः ॥

133

Sl. No: 30368 | जातकपद्धतिः | Ms. No: P. 2301/2

Beginning

नत्वा विघ्नपशारदाच्युतशिवब्रह्मान्तमुख्यग्रहान्
कुर्वे जातकपद्धतिं स्फुटतरां ज्योतिर्विदां प्रीतये ।
यन्त्रैः स्पष्टतरोऽत्र जन्मसमयो वेद्योऽत्र चेटास्फुटा
यत्पक्षेण घटंत उद्गम इहास्तर्तुं सषद्भस्सच ॥ (?)

End :

नन्दिग्रामे केशवो विप्रवर्यो
योऽभूद्धोराशास्त्रसङ्घं विलोक्य ।
तेनोक्तेयं पद्धतिर्जातकीया
चत्वारिंशद्वृत्तबद्धा सुबोधा ॥
ये सुबोधां पठन्तीमां अग्र्यां जातकपद्धतिम् ।
होराविदश्च विन्दन्ते लोके मानं यशश्च ते ॥

Colophon :

इति श्रीकेशवदैवज्ञविरचिता जातकपद्धतिः सम्पूर्णा ॥

134

Sl. No : 30393 | जातकपद्धतिव्याख्या | Ms. No: P. 7579/2

Beginning :

व्याख्या । अहं श्रीपतिभट्टनामा द्विजः शिष्यप्रार्थनया जातककर्मपद्धतिं वक्ष्ये । जातस्यैव जातकं जातस्य बालस्य जन्मान्तरार्जितसदसत्कर्मणां जनितशुभाशुभफलनिरुपकं शास्त्रं जातकमित्युच्यते ॥

End :

अस्यां पद्धतौ अध्यायानामष्टके वृत्तसंख्या षट्त्रिंशच्चन्द्रप्रमाणम् । १३६ यस्माचादृशी श्लोका अनुष्टुप्छन्दसां तु एकेन श्लोकेन आद्यया द्विशत्या ग्रन्थ संख्या प्रोक्ता ।। + + तदा शतद्वयमेकं २०२ श्लोकादधिकं भवति ।।

Colophon :

इति श्रीमद्गुणकचक्रचूडामणिश्रीवल्लभात्मजकृष्णदैवज्ञविरचिते श्रीपतिभट्ट कृतजातककर्मपद्धत्युदाहरणे प्रकीर्णकाध्यायो नाम अष्टमः ।।

135

Sl. No : 30395 **जातकपद्धतिव्याख्या** **Ms. No : B. 774/2**

Beginning :

श्रीगणेशं नमस्कृत्य केशवस्यैव पद्धतेः ।
गणितं विश्वनाथेन क्रियते बालबुद्धये ।।

अहं केशवः जातकं जातस्य बालकस्य जन्मान्तरार्जितसत्कर्मजनितं शुभाशुभफलनिरूपकं शास्त्रं जातकमित्युच्यते ।।

End

ननु ओजस्समत्वे अत्र दशाक्रमार्धं बलमानीयम् । तत्समत्वे आयु षोऽधिकतोक्ता । ननु षड्बलसाम्ये (?) तत्कथं षड्बलसाम्ये सति-तस्यायुरधिकम् । तस्याद्या दशा इत्युच्यते ।।

Colophon :

इत्यायुर्दायाध्यायः ।। (इति ७७ तमपत्रे)

136

Sl. No: 30396 **श्रीपतिपद्धतिव्याख्या** **Ms. No: P. 2125**

Beginning

जगदुत्पत्ति स्थितिसंहृतिकारणमविकारि सच्चिदानन्दम् ।
श्रीमच्छ्रीकृष्णाख्यं तेजो मे हृदि सदा स्फुरतु ।।
आचार्यश्रीपतिकृता जातके कर्मपद्धतिः ।
व्याख्यायते मया स्पष्टं सूर्यदेवेन यज्वना ।।

End :

ततो मानसाख्यकरणं वासना सह व्याख्यातम् ।

ततो मासाधिमासक्षयनिर्णयाख्यो ग्रन्थः कृतः ।

इदनीं + गुप्तकृतखण्डकाद्यकरणं व्याख्याता चिकिषावर्तते ताच कृतचदेवकीपुत्रपूरयिष्यति ॥

Colophon:

इत्थं निध्रुवगोत्रेण सूर्यदेवेन यज्वना ।

कृतं जातकपद्धत्यां सङ्कीर्णफलवर्णनम् ॥

इति सूर्यदेवसोमसुद्धिरचितश्रीपतिपद्धतिव्याख्याने जातकालङ्कारे प्रकीर्णकाध्यायोऽष्टमः । समाप्तं चेदं शास्त्रम् ॥

137

Sl. No: 30402 | जातककर्मपद्धतिः | Ms. No: B. 631/b

Beginning :

जगदुदयस्थिति संहृतिकारणमविकारि सच्चिदानन्दम् ।

श्रीकृष्णाख्यं तेजो मे हृदि सदा स्फुरतु ॥

आचार्यश्रीपतिकृता जातके कर्मपद्धतिः ।

व्याख्यायते मया स्पष्टं सूर्यदेवेन यज्वना ॥

End :

अथ प्रथमाध्याये एकादश कृत्तनि ११ + ग्रन्थानामेकोनं शतद्वयं सम्पन्नमित्यनेन श्लोकेन प्रदर्शितम् ॥

एवमियं श्रीपतिकृता जातककर्मपद्धतिर्यथामति यथाशास्त्रं यथासम्प्रदायं व्याख्याता । अनेनैव व्याख्यानेन श्रीधरकृता पद्धतिरपि व्याख्याता × ततो मासाधि मास × य निर्णयाख्यग्रन्थः ।

इत्थं नैध्रुवगोत्रेण सूर्यदेवेन यज्वना कृतं जातकपद्धत्यां संकीर्णफलवर्णनम् ॥

Colophon :

इति सूर्यदेवसोमसुद्धिरचिते श्रीपतिपद्धतिव्याख्याने जातकालङ्कारे प्रकीर्णकाध्यायोऽष्टमः ॥

138

Sl. No: 30403 **जातकपद्धतिव्याख्या** Ms. No: P. 4812/2

Beginning :

वागीश्वरीं विघ्नराजं प्रणिपत्य गुरुं तथा ।
जातके पद्धतिं गूढां श्रीधराचार्यनिर्मिताम् ॥

\+ \+ \+

टीकामहं × × पदां मृदुबुद्धिहिताय × × समयमाचारो यच्छास्त्रप्रारम्भे अतिमान × देवता नमस्कारं कुर्वन्ति ॥

End :

तदा सरुपे योगे भवति नान्यथा । तद्वत्फलानां कल्पनाकार्यं भावेष्वित्याह । तस्मात् × वेषु मतिमान् बुद्धिमा × सर्वेषां भावानां विकल्पनं कुर्यात् । येन विशेषं समस्तं जातके विहितं नृणां फलं सः प्रत्ययकारकं जायते उत्पद्यते ॥

Colophon :

इति श्रीधराचार्यकृतजातकपद्धतिटीकायां अष्टमोऽध्यायः समाप्तः । समाप्तेयं पद्धतिः ॥

139

Sl. No : 30405 **जातककर्मपद्यम्** Ms No: : 6847/6

Beginning :

अनन्दकन्दं करुणापयोधिं
अनीशितारं जगदीशितारम् ।
अगोचरं वाङ्मनसश्च नित्यं
नमामि शम्भुं फणिराजभूषणम् ॥
अनुग्रहार्थं रचयामि पद्यं +
होराक्रियायाः परमेश्वरोऽहम् ॥

End :

× × तस्यमुदितः सम्पन्न एतैर्गुणैः
सूरिलिङ्गनदीक्षितोऽपि निखिलग्रन्थान् पुनर्व्याकरोत् ॥

तत्पादम्वुरुहप्रणामजनित प्रज्ञेन जीयान्मया
लोके सा परमेश्वरेण रचिता × ॥

Colophon :

परमेश्वरहौरिकाग्रणीरचिने जातककर्मवर्त्मनि ।
बुधहोरिकचित्तरञ्जने निरगादि शकटाक्षतोऽखिलम् ॥

140

Sl. No: 30406 जातककलानिधिः Ms. No : P. 8816/1

Beginning :

सत्यज्ञानयुतं योगिं सृष्टिस्थितिलये स्थितम् ।
सच्चिदानन्दरूपं तं केसरिं नौमि सिद्धये ॥
+ + +
यस्यालोकेन लोकानां अदृष्टार्थोऽपि गम्यते ।
मया प्रकाश्यते पूर्णः स जातककलानिधिः ॥

End :

इत्यादि सकलं ज्ञात्वा शुभाशुभमुदीरयेत् ।
धर्मशास्त्रोक्तमार्गेण खेचराणां बलाबलम् ॥
कामाक्षीनामधेयेन कामाक्षीचरणार्पितम् ।
× × देशकालं चैव स जातककलानिधिः ॥

Colophon :

इति जातककलानिधौ अष्टकवर्गस्त्रीजातककथनं नाम त्रयोदश (:)
कलाविलासः ॥

141

Sl. No : 30411 जातककलानिधिः Ms No: P. 3186/2

Beginning :

श्रीमूर्तिरूपिणं देवं त्रयीवेद्यं शुभावहम् ।
त्रिगुणातीतमव्यक्तं वन्दे सूर्यं सदा विभुम् ॥
रव्यादिग्रहचारेण वक्ष्म्यहं भावजं फलम् ।
लग्ने रविः । अरोग्यं भवति —

End :

द्वादशे केतुः । चपलचित्तः । नयनरोगः । विदेशवासः ।
अपात्रे प्रियकरः । देशान्तरसञ्चारः । जन्मभूमिपरित्यागः । मोक्षवान् ।

Colophon :

इति श्री नृसिंहवर्य दीक्षितेन सकलशास्त्रसंग्रहवाक्यरूपजातककलानिधिः द्वादशभावफलं सम्पूर्णम् ॥

142

Sl. No : 30412 **जातककलानिधिः** **Ms. No : P. 3254**

Beginning :

ज्योतिःप्रकरनाथाय प्रतिभाभासुरात्मने ।
बहिरन्तस्तमोहन्त्रे मिहिराय नमो नमः ॥
यस्यालोकेन लोकानामदृष्टार्थोऽवगम्यते ।
मया प्रकाश्यते पूर्णः सग्रहभावफलक्रमः ॥

End

जीवांशे द्विजवि × धाङ्करादिधर्मैः
काव्यांशे मणिगणरत्नभूषणाद्यैः ।
सौरांशे श्रमपथभारनीचशिल्पैः
कर्मेशाध्युषितसमानकर्मसिद्धिः ॥

Colophon :

— — —

143

Sl. No: 30417 **जातककलारत्नाकरः** **Ms. No: P. 3184/3**

Beginning

श्रीनृसिंहमहं वन्दे गुरुसद्भक्तिचित्प्रदम् ।
द्विजोत्तमकृतौन्नत्यं दैवज्ञवरभूषणम् ॥
प्रणम्य शिरसा देवं लोकनाथं जगद्गुरुम् ।
ज्योतिश्शास्त्रेषु सर्वज्ञं सूर्यदेवमहं भजे ॥
पाकं द्वादशभाव + श्रीविष्णुगुप्तास्त्रिभिः ॥

End :

End :

दशादौ सुखमाप्नोति दशामध्ये महद्भयम् ।
दशान्ते राजभीतिश्च देहनाशमथापि वा ॥

Colophon :

इति जातकरत्नाकरः सम्पूर्णः ॥

144

Sl. No : 30418 **जातककल्पतरुः** **Ms. No : B. 5218**

Beginning :

योगिनीदशारीत्या जातकफलानि ।
अभोन्नङ्गलापिङ्गला धन्यका च
तथा भ्रामरी भद्रिकारष्कका च ।
तथा सिद्धिका सङ्कटस्था शिवस्था
शिवा यः पुरो योगिनोरुत्तमं च ॥

End :

शुभदशापि अन्तर्दशायां शुभाशुभफलम् । अशुभा चेत् मिश्रफलम् । अशुभा दशायां अन्तर्दशा शुभाशुभफलम् । अशुभा चेत् कष्टम् । इति ज्ञेयम् ॥

Colophon :

इति जातककल्पतरौ जातकस्कन्धे दशायोगिनी दशाकथनं नाम षड्विंशतितमोऽध्यायः ॥

145

Sl No: 30432 **जातकचन्द्रिका** **Ms. No: P. 2688/9**

Beginning

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरं महः किञ्चिद्वीणाधरमुपास्महे ॥
फलंति नक्षत्रदशाप्रकारेण विवृणमहे ।
वयं पाराशरीं होरामनुसृत्य यथामति ॥

End :

पापिनश्चेद्ग्रहस्तेषामुच्चत्वे सति किं फलम् ।
बलवत्त्वघातुकानां यत्फलं लभ्यते हि तत् ।।
यज्ञनारयणाभिख्ययायजाततनूभव ।
श्री वेङ्कटेशाचार्येण कृता जातकचन्द्रिका ।।

Colophon :

इति श्री जातकचन्द्रिकायां केरलीयजातकं समाप्तम् ॥

146

Sl. No: 30436 **जातकचन्द्रिका** **Ms. No : P. 4333/14**

Beginning :

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरमहं वन्दे वीणाधरमुपास्महे ।।
वयं पाराशरीहोरां अनुसृत्य यथाविधि ।
फलानि नक्षत्रदशाप्रकारेण विवृण्महे ।।

End ;

शिरसा शासनं तस्य धारयन्ति नृपास्सदा ।
कालत्रिकोणगे लाभे अष्टमाधिपतौ यदि ॥
तद्दशान्तर्दशाकाले देहपीडां विनिर्दिशेत् ॥

Colophon :

इति जातकचन्द्रिकायां पराशरसूत्रे प्रतिलम्भपञ्चमोऽध्यायः ॥

147

Sl. No : 30449 **जातकचन्द्रिका** **Ms. No : C. 2576/1**

Beginning :

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरमहं किञ्चित् शोणाधरमुपास्महे ॥
फलानि नक्षत्रदशाप्रकारेण विवृणमहे ।
वयं पाराशरीं होरां अनुसृत्य यथामति ॥
बुधैः भावादयः + विशेषतः ॥

End :

योगेषु केचिज्जायन्ते मूढा शश्मोरगर्दभाः ।
योगास्ते किं करिष्यन्ति स्वदशानामनामगे ।।
पापिनः स्युः ग्रहास्तेषां उच्चत्वे सति किंफलम् ।
बलवत्त्वे पातकानां यत्फलं लभ्यते हि तत् ।।

Colophon :

इति कालिदासकृता जातकचन्द्रिका ।।

148

Sl. No: 30450 जातकचन्द्रिका **Ms. No: P. 4542/3**

Beginning :

नारायणमहं वन्दे सुरनाथं जगद्गुरुम् ।
सर्वलोकोपकारार्थं वक्ष्ये जातकचन्द्रिकाम् ।।
श्रीवाणीधरमिश्रेण क्रियते जातचन्द्रिका ।
तनुर्धनं च सहजो बन्धुपुत्रौ हरिस्तथा ।।

End :

अधोरा घांक्षी महोदरी मन्दे मन्दाकिनी ।
× मिश्रे राक्षसी चैव यथाक्रमम् ।।
दिनऋक्षगता नाड्यः सप्तविंशतितारकाः ।
षष्ठिभक्ता भवेद्युक्षं तत्कालेन्दुगतस्फुटम् ।।

Colophon :

— — —

149

Sl. No : 30452 जातकचन्द्रिकाव्याख्या **Ms. No : P. 9626/3**

Beginning :

वयं మేము नक्षत्रदशाप्रकारेण నక్షత్రదశప్రకారముగాను फलानि ఫలములనుగురించి पाराशरीं होरां పరాశరసంబంధమైన జ్యోతిశాస్త్రమును अनुसृत्य అనుసరించి यथामति పూర్వమతములమతిక్రమించిన మట్టుగాను विवृणमहे వ్యాఖ్యానుచేయుచున్నాను.

End :

यज्ञनारयणामिख्य ಯಜ್ಞನಾರಯನುಡನು ಪೆರುಗ್ಗ ಚೂಕ ದೀಕ್ಷಿತುನಿಯೊಕ್ಕ तनूभवा ಕುಮಾರುಡೈನ श्रीवेङ्कटेश्वर्वेण ಸಂಪದ್ಯುಕ್ತುಮ್ಯೈನ ವೆಂಕಟೇಶ್ವರಪಂಡಿತುನಿ ಚೇತನು जातकजन्द्रिका ಜಾತಕಚಂದ್ರಿಕೆಯನು ಜ್ಯೋತಿಶಾಸ್ತ್ರಮು कृता ಚೆಯಬಡೆನು.

Colophon :

इति श्रीमच्छंकरप्रसादलब्धकवितामाधुरीधुरीण चिन्तलपल्लिवंशपयः पारावारराकासुधाकर समुद्दण्ड कोदण्डसूरीपुत्रनिर्यमाम्बागर्भशुक्तिमुक्तायमान संस्कृतान्ध्रभाषाप्रवीणअनंतरामसूरिविरचिता जातकचन्द्रिकान्ध्रटीका सम्पूर्णा ॥

150

Sl. No : 30459 **जातकजीवनम्** **Ms. No : B. 175/1**

Beginning :

वन्दे मन्दारमूलस्थं बृन्दारकनिषेवितम् ।
कुन्देन्दुस्फटिकाकारं चन्द्रमौलिं शिवाप्तये ॥
परस्परविरुद्धार्थज्योतिश्शास्त्रार्णवोदरे ।
मज्जतामुडुपं पुंसां वक्ष्ये जातकजीवनम् ॥
चरात् स्थिरगताः खेटाः स्थिरादुभयाग ग्रहाः ।
क्रमाद्भवन्ति बलिनो राशयोऽपि तथैव च ॥

End :

अन्योन्यषष्ठाष्टमगौ दशाभुक्तेश्वरौ यदि ।
जन्मकाले च तत्कले मृतिस्थाने च्युतिर्भवेत् ॥
जन्मनामांशराशीशौ दशाधीशे तु दुर्बले ।
अशुभं निर्दिशेत्तस्मिन् प्रबले तु शुभं वदेत् ॥

Colophon :

× होराम्बाधेर्विमथ्य बहुधा तत्सरभूतं सुधा
जातं जातकजीवनं प्रकटितं भावज्ञसम्प्रीतये ।
आत्रेयेन हि रामचन्द्रकविना सोऽयं रहस्यार्थको
ग्रन्थः श्लोकशतात्मको विजयतां तस्मात्फलं चैधताम् ॥

151

Sl. No : 30463 जातकदर्पणम् Ms. No: P. 1839/3

Beginning :

लग्नगो दिनपतिः पितृमृत्युः
वत्सरे तिथि × तै च करोति ।
सप्तभूपरिमिते च वत्सरे
यच्छति द्रविणगोधनहानिः ॥

End :

जातकत्रिंशता प्रोक्तं हिल्लाजेन सुबुद्धिना ।
प्रत्यक्षश्च चमत्कारो दृश्यते फलनिश्चये ॥
वर्षाकाले तथा जन्मप्रश्नकाले तथैव च ॥

Colophon :

इति जातकत्रिंशत् समाप्ता ॥

152

Sl. No: 30465 जातकत्रिंशत् Ms. No : P. 7383/2

Beginning

जीवको मारकश्चैव पोषके पोषकस्तथा ।
दापको जारकश्चैव वेदिताख्या षडेव तत् ॥
एतत्सर्वेषु वेदेषु भूतेषु चिन्तनीया प्रयत्नतः ।
तत्तद्दशायां तत्कार्यं सूक्ष्मं ज्ञात्वा फलं वदेत् ॥
अथ जातकाध्यायः ॥

End :

अर्केण बध्यते मन्दः शनिर्मङ्गल बध्यते ।
मङ्गलेन गुरुं हन्ति गुरुणा सोम बध्यते ॥
सोमेन शुक्रमरणं शुक्रेण बुध बध्यते ॥

Colophon :

— — —

153

Sl. No : 30470 | जातकपद्धतिः | Ms. No : P. 6352/1

Beginning :

नत्वा विघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान्
कुर्वे जातकपद्धतिं स्फुटतरां ज्योतिर्विदां प्रीतये ।
यन्त्रैः स्पष्टतरोऽत्रजन्मसमयो वेद्योऽत्र खेटस्फुटं
तद्भम × षष्ट × स्स च ॥

End :

यो भूद्धराशास्त्रसङ्घं विलोक्य
तेनोक्तियं पद्धतिर्जातकीया । +
चत्वारिंशद्वृत्तबद्धानुबोधा ॥
ये सुबोधां पठन्तीमां अग्र्यां जातकपद्धतिम् ।
होराविदश्च विन्दन्ति लोके मानं यशश्च ते ॥

Colophon :

इति श्री केशवदैवज्ञविरचितजातकपद्धतौ दशाध्यायः षष्ठः ॥

154

Sl. No : 30473 | जातकपद्धतिः | Ms. No: P: 10271/15

Beginning :

सच्चिदानन्दमद्वैतं वेदवेदाङ्गवेदिनम् ।
नैकधा सर्वथाम्नायप्रतिपादितमच्युतम् ॥
वन्दे कृष्णं कृष्णनामा व्याख्यानं कर्तुमाहरेत् ॥
श्रीरामचन्द्रंभारतीजयकेशवभाषितम् ॥
वन्दे जिनेन्द्रं च × पकारकम् ॥
आत्रेयः केशवो नाम शास्त्रं संक्षिप्तमारभेत् ॥

End :

लग्नरूढत्रिकोणस्थैः पश्यद्भिर्मार्गहैर्वदेत् ।
धातुमूलं च जीवं च विचिन्त्य च बलान्वितैः ॥

Colophon :

इति केशवीये धातुमूलं जीवचिन्तानिरूपणं नाम पञ्चमोऽध्यायः ॥

155

Sl. No: 30474 **केशवीयम्** **Ms. No: P. 10271/17**

Beginning :

उदयादित्रिकं चैव उच्चगो यदि पश्यति ।
अर्थस्त्रीराज्यलाभादि शुभं सर्वं प्रयच्छति ॥
उदयादित्रिकं पश्येत् यदि बन्धुग्रहो बलः ।
राशीशश्च त्रिके तत्तत्च्छुभनीचविपर्ययः ॥

End :

मेषोदये तथाऽऽरूढेच्छत्र × राशिषु ।
तृतीये च सितेपोन्ते द्रुतमेति विनिर्दिशेत् ॥
सप्तमस्थे गुरौ तत्र चरराशिषु संस्थिते ।
वित्तभ्रातृगयोश्चन्द्रशुक्रयोर्द्रुतमेष्यति ॥
इति समुद्रयानम् । आहत्य श्लोकः २७० ॥

Colophon :

— — —

156

Ms. No. : 30558 **जातकपद्धतिव्याख्या** **Sl. No: P. 2635**

Beginning :

केशवोक्तजनुर्योगोद्देशं नारायणः स्फुटम् ।
तनोत्यल्पमतिप्रीत्यै नत्वा मल्लरिपुं गुरुम् ॥

ग्रन्थारम्भे विशिष्टशिष्टाचारानुमितश्रुतिविधितकर्तव्यताकं निर्विघ्नेन परिसमास्यर्थं गणेशादिनमस्कारपूर्वकं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति – नत्वेति ॥

End :

तादृक्छकादौ गोविन्दसूनुना निर्मिताऽमला ।
व्याख्योद्देशविचाराद्या केशवैय्यजनुः सुधीः ॥
ज्योतिश्शास्त्रसुधाम्भोधेः कौस्तुभोऽयं समुद्धृतः ।
सन्त हृदि निधायैनं परां ख्यातिमवाप्स्यथ ॥

Colophon :

इति श्रीमत्सकलदैवज्ञोत्तमगोविन्दसूनुना नारायणदैवज्ञसार्वभौमेन विरचितः सकलरहस्यार्थप्रकाशकः जातककौस्तुभः सम्पूर्णः ।।

157

Sl. No : 30483 जातकपारिजातः Ms. No : P. 2267

Beginning :

श्रीवेङ्कटाद्रिनिलयः कमलाकामुकः पुमान् ।
अभङ्गुरविभूतिस्ते तरङ्गयतु मङ्गलम् ।।
श्रीकान्ताजशिवस्वरूपममरज्योतिर्गणस्वामिनं
मायातीतमशेषजीवजगतामीशं दिनेशं रविम् ।
नत्वा गर्गपराशरादिरचितं सङ्गृह्य होराफलं
वक्ष्ये जातकपारिजातमखिलं ज्योतिर्विदां प्रीतये ।।

End :

कन्दर्पाष्टमधर्मराशिजनितं व्यापारलाभान्त्यजं
नारीजातकलक्षणं निगदितं चक्रं दशान्तर्दशा ।
श्रीविद्याधिकवेङ्कटाद्रितनयश्रीवैद्यनाथः सुधीः
आदित्यादिसमस्तखेटकृपया विद्वज्जनप्रीतये ।।
होरासिन्धुसमुद्धृतामृतमयीमष्टादशाध्यायिनीं ।
चक्रे जातकपारिजातसरणिं गीतोत्सुकश्लोकिनीम् ।।

Colophon :

इति जातकपारिजातः समाप्तः ।।

158

Sl. No. : 30491 जातकप्रकरणम् Ms. No: P. 8767/27

Beginning :

उत्तरे प्रथमे पादे पुष्ये चैव तु मध्यमे ।
पूर्वाषाढात्रिपादौ च आदौ चित्रार्धमेव च ।।
अस्मिन् जातकुमारं च पितॄन् हन्ति न संशयः ।।

चित्रार्धे पुष्यमध्ये द्विपादे पूर्वाषाढस्यान्त्यपादे तृतीये ।
जातस्तत्रश्चोत्तरार्धे विधत्ते मातापित्रोर्भ्रातरश्चात्मनाशः ॥

End :

स्वतन्त्रशीलो द्विजदेवभक्तः
शठात्मकः शास्त्रविदप्रमत्तः ।
अडम्बरी हास्यरसप्रगल्भः
मनोहरो मानुषभे प्रसूतः ॥
क्रूरः कुमार्गी कुहनेषु सक्तः
स्वकार्यनिष्ठो विकृतः प्रजाकरः ॥
अरिप्रगल्भो पररन्ध्रदः श्री
समत्सरी राक्षसभे प्रसूतः ॥

Colophon :

इति जातकप्रकरणे संवत्सरफलं समाप्तम् ॥

159

Sl. No : 30500 **दिवाकरपद्धतिः** Ms No: P: 2336

Beginning :

श्रीमच्छिवाख्यं गणि क
चूडामणिं सज्जनबृन्दवन्द्यम् ।
विदुर्विदोऽयं धिषणेन तुल्यं
तं नौमि नित्यं धिषणाप्तिहेतोः ॥
श्रीकेशव श्रीपतिसुन्दरादि प्रणीततन्त्रादधिकृत्य सारम् ।
प्रकाश्यते सुज्ञदिवाकरेण पद्यांशुभिः जातकमार्गपद्मम् ॥

End :

द्वयोस्त्रयाणां यदि वीर्यसाम्ये
तत्ता × संगुणयेत्तदायुः ।
योगं वक्ष्येन भजेत्तदायुः
भवेन्मुनीन्द्रैः स्वयशोभिरुक्तम् ॥

Colophon :

इति दिवाकरपद्धतिः समाप्तः ॥

160

Sl. No: 30502 **दिवाकरपद्धतिव्याख्या** **Ms. No: P. 2336/2**

Beginning

अधीत्य ज्यौतिषं शास्त्रं अप्रमेयान्महागुरोः ।
तस्माद्धोराविदां श्रेष्ठात् भारद्वाजकुलोद्भवात् ॥
त्रिस्कन्धशास्त्रकलशाम्बुधिमन्थरेण
दैवज्ञमत्तगजकेसरिणा च टीका ।
श्रीतिम्मरायविदुषा कृपया हरेस्तु
सन्तन्यते मृदु दिवाकरपद्धतेस्सा ॥

End :

आचाराल्लभ्यतेऽप्यायुः आचारादीप्सिताः प्रजाः ।
आचाराद्धनमक्षय्यं आचारो हन्त्यलक्षणम् ॥
अस्य आश्वलायनवचनम् —
श्रियमायुर्यशो वर्चः प्रजाः पशुवसूनि च ।
सर्वसम्पन्नं मर्त्यः सदाचारपरो लभेत् ॥

Colophon:

इति श्रीतिम्मरायविरचितायां जातकालङ्काराख्यकर्नाटकभाषाव्याख्यायां दिवाकरपद्धतिप्रदीपे आयुर्दायसाधनाध्यायः पञ्चमः । समाप्तोऽयं ग्रन्थः ॥

161

Sl. No : 30503 **जातकमुक्तावली** **Ms. No: B. 773**

Beginning :

प्रणम्य हेरम्ब पदारविन्दं
× श्रीगुरुमर्कपूर्वान् ।
मुक्तावली जातकपूर्विकेयं
गुणाधिका मौरिकभूषणीयम् ॥

निर्मथ्य शास्त्रत्रयरत्नराशिं
पद्यैरनेकैर्गुरुलब्धबुद्ध्या ।
प्राग्जन्मकर्मार्जितबोधयित्री
विरच्यते दैवविदा शिवेन ॥

End :

दृष्टिस्थानेष्वर्कभागान्तरस्थः
शीघ्रानन्दस्तस्य दृक् शोभना स्यात् ।
चक्राद्यन्तः खण्डदृग्वामदज्ञा
ज्ञेया ताभ्यां दक्षिणा प्रौढवीर्याः ॥
इति विशेषदृष्ट्यध्यायः ॥ ...

Colophon :

इति मुक्तावल्यां जातकशास्त्रावबोधरूपायां शिवदासनिर्मितायां × समाप्तः ॥

162

Sl. No : 30506 **जातकयोगावली** **Ms. No: P. 29/19**

Beginning :

उमासुतं नमस्कृत्य अम्बिकां × नीम् ।
योगानन्दगुरुं वन्दे परमानन्दरूपिणम् ॥
उमारमणमोंकारं सर्वेशं शंकरं विभुम् ।
नीलकण्ठं महादेवं शंकरं प्रणमाम्यहम् ॥
श्रीवत्सगोत्रद्भव × कर्ता
नृसिंहनामाऽखिलशास्त्रवेत्ता । + योगावलिमादरेण ॥

End :

योगे सहचर्यके जाता सा नारी सुरपूजिता ।
तस्य शीलं भवेच्छ्रेष्ठं पातिव्रत्यशिरोमणेः ॥
॥ पूर्वोक्तः सन्तानयोगः ॥

Colophon :

एवं त्रिंशद्योगावली । श्रीनीलकण्ठात्मजनृसिंहेन विरचित जातक योगावलीग्रन्थः समाप्तः ॥

163

Sl. No : 30059 **जातकयोगावलिः** **Ms. No : P. 4751/2**

Beginning :

उमासुतं नमस्कृत्य अम्बिकां सहवासनाम् ।
योगानन्दगुरुं वन्दे परमानन्दरूपिणम् ॥
श्रीवत्सगोत्रोद्भवग्रन्थकर्ता
सिद्धान्तशास्त्रो × सो समर्थो ।
नृसिंहनामाखिलशास्त्रवेत्ता
योगावलिं जातक भाववक्ता ॥

End :

लग्नात्पुत्र गते मन्दे तदीशे भौमसंयुते ।
रविराहुस्थिते रन्ध्रे सहचर्या भवेद्ध्रुवम् ॥
पुत्रस्थानाधिपेनीचे लग्नेशे राहुसंयुते ।
धैर्यस्थानं गते केतुसहचर्या भवेद्ध्रुवम् ॥

Colophon :

जातकयोगावलिस्समाप्ता ॥

164

Sl. No: 30514 **जातकरत्नम्** **Ms. No : P. 7620**

Beginning :

× × मकं निर्मलमप्रमेयम् ।
निरञ्जनं निर्गुणमिन्दुचूडम्
नितान्तशान्तं नितरां नतोऽस्मि ॥
अस्मिन् जातकरत्ननाम्नि कथितः संज्ञाविधिः पूर्वतो
भावद्वादश राजयोगवितातिस्तद्भङ्गयोगा अपि ।
आयुर्दायविधिर्दशाफलविधिस्तत्कालचक्रादिकं
श्लोकानान्तु सहस्रकैरनुपमैः संगृह्यते सारतः ॥

End :

विद्या सुवार्ता सुखभोजनञ्च
वेश्यारति × मतःपरञ्च ।
वाणिज्यकं चैव विदेशयात्रा
ततो मह × मेति संज्ञम् ॥
अष्टोत्तरशतमंशं भुञ्जानश्च द्रुमा × × क्रमशः । शुभमस्तु ॥

Colophon :

— — —

165

Sl. No: 30516 जातकरत्नाकरः Ms. No: P. 3020/1

Beginning :

श्रीमद्वराहमिहिरार्यवसिष्ठगा ×
× × द्धसेनयवनार्यपराशराद्यैः ।
यत्प्रोक्तमद्य भुवि विस्तरतो मुनीन्द्रैः
संक्षिप्यते तदखिलं विदुषांह × ॥
अस्मिन् जातकरत्नाकरनाम्नि कथितः —

End :

रिष्फे देवगुरौ स्थिते बलवती रिष्फाधिपे स्वोच्चगे
जातोऽसौ समुपैति ब्रह्मभवनं सौम्यं स्वकर्मार्जितम् ।
रिष्फे पापयुते कुजे नवमगे पापाधिके कर्मणी
जातोऽसौ नरके पतन्निति बुधाः शास्त्रान्तपारा विदुः ॥

Colophon :

इति जातकरत्नाकरे व्ययभावफलं नाम चतुर्दशोऽध्यायः । जातकरत्नाक द्वादशभावफलं संपूर्णम् ॥

166

Sl. No: 30520 जातकवल्लभीयम् Ms. No: P. 3992/6

Beginning :

श्रीमद्विघ्नेशवाणीगुरुविधिमधुभिछ × शैलेन्द्रकन्या
भास्वच्छीतांशुभौमज्ञगुरुकविशशभिध्वान्तकेतू प्रणम्य ।

तेषां कारुण्यमात्रविभवमयमहं प्राप्य वक्तुं प्रवर्ते
शास्त्रं श्रीवल्लभाख्यं जनसुखदुरितोद्बोधनैकप्रदीपम् ॥
अथ ब्रह्मादयो जटिलमहेश्वरप्रभृतय आहुः ॥

End :

× × वनाद्व्यवना मासाधिकेषु वा दृष्टिपातदेहसिद्धिं च चिन्तनीयम् । पुरातनैः ब्रह्माद्यैरीश्वरवचनप्रमाणत्वात् उक्त × ज्ञानं × × सिद्धि × × लकां × × दकं ज्ञात्वा ग्रहवलावलान् सम्यक् ज्ञात्वा योगमविकल्प्य × × × पात्य विदेहसिद्धिं चिन्तनीयम् ॥

Colophon :

इति श्रीवल्लभायां गुरुप्रस्तारे राश्यंशदशापातं नाम सप्तविंशोऽध्यायः ॥

167

Sl. No : 30523 **जातकशिरोमणिः** **Ms. No : P. 8773/13**

Beginning :

लग्नाधिपो वा जीवो वा शुक्रो वा यदि केन्द्रगः ।
तस्य पुत्रस्य दीर्घायुः धनवान् राजवल्लभः ॥
केन्द्रत्रिकोणेषु न यस्य पापः
लग्नाधिपःसुरगुरुश्चतुरष्टसंस्था ।
भुक्त्वा सुखानि विविधानि च पुण्यकर्म ×

End :

लाभेरिपुर्भ्रातरि सैंहिकेय
शुभेक्षितः स्याद्यदि चन्द्रलग्नात् ।
अल्पायुपस्थोऽपि बलाच्चिरायुः
सम्पद्विहीनोऽपि भवन्ति सन्तः ॥

Colophon :

इति जातकशिरोमणिः ॥

168

Sl. No ; 30527 जातकशेखरः Ms. No : P. 1188/1

Beginning :

अथ धनभावः —

धनाधिपो विक्रम संस्थितश्चेत्
स्वमन्दिरस्थो यदिसौम्य × ।
× द्धि कुरुते नराणां
पराक्रमी शक्रतुल्यो भवन्ति ॥

End :

पूर्वोक्तबिन्दवो रन्ध्रे फलमल्पं विचिन्तयेत् ।
त्रिष × यगते सूर्ये शोध्याल्पात्रिसमन्विते ॥
तत्तद्भावाभिवृद्धिःस्याद्बलाबलवशात्तदा ।
एकद्विबिन्दुशून्येन तत्तत्पितृविनाशनम् ॥
इति × र्व्यष्टकवर्गं समाप्तम् ॥

Colophon :

इति जातकशेखरे फलवर्गः समाप्तः ॥

169

Sl. No : 30532 जातकसारः Ms. No : P. 4065

Biginning ;

पार्वत्युवाच —

देवदेव महादेव सर्वज्ञ शशिभूषण ।
× × संक्षेपेण वदस्व मे ॥
अनुग्रहात्त्रिलोकस्य मयिकारुण्य × ×
× × वदस्व मे ॥

ईश्वर उवाच —

शृणु देवि प्रवक्ष्यामि × × × ।
सप्तविंशतिऋक्षणां राशयो द्वादश स्मृतां ॥

End :

तत्तत्स्थानगतानां च पाके च मरणं भवेत् ।
सवितृतनय एते अष्टमस्था प्रसूनराः
ज्वलनसलिलगन्धव्याधिमृत्सूरिद्रम् ।
पितृमरणं कृतघ्नं जातकस्य क्रमेण ॥ (?)

Colophon :

इति उमामहेश्वरसंवादे जातकसारं सम्पूर्णम् ॥

170

Sl. No : 30533 **जातकसारः** **Ms. No : P. 2688/14**

Beginning :

प्रणिपत्य परं ज्योतिर्ज्योतिषां जगतीतले ।
तमसः प्रसवं जन्म जज्ञे शास्त्रप्रदीपकाम् ॥
लग्नाधिपतिर्लग्ने नीरोगं प्रभुरजीवितं कुरुते ।
अतिबलमवनीपतिं वा भूलाभसमन्वितं पुरुषम् ॥

End :

व्ययभावे देवग्रहाधिष्ठिते देवलोकं गच्छति ।
अन्तरिक्षग्रहाधिष्ठिते तत्रस्थः राहौ केतौ नरके वसति ॥
पापग्रहा बलवन्तस्तिष्ठन्ति चेदङ्गवैकल्यम् ।
शुभग्रहाश्चेत्यागर्वा अशुभस्थित्यां विनाशो भवति ॥

Colophon :

इति श्रीविद्याधरविरचिते जातकसारे भावफलं सम्पूर्णम् ॥

171

Sl. No: 305 39 **जातकसारावलिः** **Ms. No: P. 3022**

Beginning :

यस्योदये जगदिदं प्रतिबोधमेति
मध्यस्थिते प्रसरति प्रकृतिक्रियासु ।

अन्तं गते स्वपिति चोच्छ्वसितैकमात्रं
भानुस्स एष जयति प्रकटप्रभावः ॥
+ + सारावलीं
होराशास्त्र विनिर्मलीकृतमनाः कल्याणवर्मा कृती ॥

End :

इत्थं होराशास्त्रं रचितं कल्याणवर्मकोविदेनैव ।
पूर्वाचार्यैरपि × भ्यर्च्य दैवज्ञः ॥
पौलिशरोमशवासिष्ठयवनबादरायणः शक्तिः ।
अत्रिश्च भरद्वाजः विश्वामित्रो गुडाग्निकेशौ च ॥ गर्गा × —

Colophon :

[इति कल्याणवर्मविरचितायां सारावल्यां वियोनिजन्माध्यायः पञ्च-पञ्चाशत्]॥

172

Sl. No: 30540 जातकादेशमार्गः **Ms. No: P. 3555**

Beginning :

यस्योदयास्तमययोस्सुरमकुटनिघृष्टचरणकमलोऽपि ।
कुरुतेऽञ्जलिं त्रिनेत्रस्सजयति धाम्नां निधिस्सूर्यः ॥
देवर्षिगणैस्सेव्यं वटमूलनिवासिनं देवम् ।
स्मरतां ज्ञानदमीशं सततं प्रणतोऽस्मि दक्षिणामूर्तिम् ॥ +
जातकादेशमार्गोऽयमविस्मर्तुं विलिख्यते ॥

End :

पितादिकारकविहङ्गमशुद्धपिण्डं
पित्रादिभावगतकृत्स्नफलैर्निहत्य ।
सत्राहृते विशति शिष्टभौमार्कपुत्रे
पित्रादिमृत्युसमयः किल तत्र वाच्यः ॥

Colophon :

इति जातकादेशमर्गे षोडशाध्यायः ॥

173

Sl. No: 30542 **जातकाभरणम्** **Ms. No: P. 1110/1**

Beginning :

श्रीदं सदाऽहं हृदयारविन्दे
पदारविन्दं गणपस्य वन्दे ।
मन्दोऽपि यस्य स्मरणेऽपि सद्यः
निर्वाणवन्द्योपमतां समेति ॥

End :

तत्र शुभयोगे शीघ्रं पुनर्जन्म भवति । तत्र पापयोगे अनेकसंवत्सरेण नरकानुभवानन्तरं पुनर्जन्म भवति । पूर्वोक्त षष्ठिभागांशकस्वरुप फलप्राप्तिः ॥

Colophon :

(50तमपत्रे) गोदावरीतीरविराजमानं पार्थाभिधानं पुटभदेनं यत् ।
सद्गोलविद्यामलकिर्तिभाजां मत्पूर्वजानां वसतिस्थलं तत् ॥
तत्रत्यदैवज्ञ नृसिंहसूनुः गजाननाराधनताभिमानः ॥
श्रीदुण्ढिराजा रचया × (52पत्रे) इति श्रीदुण्डिराजविरचिते जातकाभरणे अष्टकवर्गाध्यायः ॥ इति व्ययभावफलं सम्पूर्णम् ॥

174

Sl. No : 30543 **जातकाभरणम्** **Ms No: P: 5535**

Beginning :

श्रीदं सदाऽहं हृदयारविन्दे
पादारविन्दे वरदस्य वन्दे ।
मन्दोऽपि यस्य स्मरणेन सद्यो
गीर्वाणवन्द्योपमतां समेति ॥
उदारधीर्मन्दरभूधरेण
प्रमथ्य होरागमसिन्धुराजम् ।

श्रीधुण्डिराजः कुरुतेऽखिलार्या-
मार्यासपर्याममलोक्तिवर्यैः ।
जातकाभरणनामजातकं
जातकज्ञसुखदं विरच्यते ॥

End :

गोदावरीतीरविराजमानं
पार्थाभिधानं पुटभेदनं यत् ।
सद्गोलविद्यामलकीर्तिभाजां
मत्पूर्वकानां वसतिस्थलं तत् ॥
तत्रत्यदैवज्ञनृसिंहसूनुः
गजाननाराधनताभिधानः ।
श्रीधुण्डिराजोरचयाम्बभूवे
देवागमेऽनुक्रममाहरेण ॥

Colophon :

इति श्रीदैवज्ञ धुण्डिराजविरचिते जातकाभरणे स्त्रीजातकाध्यायः एकसप्ततिः ॥

175

Sl. No : 30544 जातकालङ्कारः Ms. No : P. 1804/3

Beginning :

देहाधिपतिः षष्ठाष्टमव्ययस्थितश्चेत् न देहसौख्यं । न पापः तदधिपः प्रबलहीनः बलहीनः तथा व्याधिमान् किंतु कोपवान् । कर्माधिपो बलहीनः । कर्म वैकल्यम ॥

End :

भ्रातृवर्गे पराक्रमेण बुधश्चेत् मातुलादि नवोसकर्मणोपायः । जननादि-नवांशादायवान् गुरुरसे तु पुत्रवर्गेण स्वर्णादिधनम ॥

Colophon :

इति जातकालङ्कारः सम्पूर्णः ॥

176

Sl. No : 30545 **जातकालङ्कारः** **Ms. No: P. 3189/3**

Beginning :

देहस्थानाधिपः गुरुबुधशुक्रः संपूर्णचन्द्रः केन्द्रत्रिकोणोच्चस्वर्क्षमित्रक्षेत्र-शुभांशवर्गोत्तमांशपारिजातांशकुङ्कुमांशकुसुमांशयुक्ताश्चेत् तद्दशायां सकल सौभाग्यभोगवान् —

End :

तत्र शुभांशे शीघ्रेण पुनर्जननम् । तत्र पापयोगे अनेकदिव्यसंवत्सर-नरकम् । नरकान्ते पुनर्जननं भवति । पूर्वोक्तषष्टिभागांशकस्वरूपफल प्राप्तिः । इति व्ययभावफलं समाप्तम् ।।

Colophon :

इति भट्टोजिदीक्षितविरचितः जातकालङ्कारः सम्पूर्णः ।।

177

Sl. No : 30547 **जातकालङ्कारः** **Ms. No : C. 4662/16**

Beginning :

सानन्दं प्रणिपत्य सिद्धसदनं लम्बोदरं भारतीं
सूर्यादिग्रहमण्डलं निजगुरुं भक्त्या हृदब्जे स्थितम् ।
येषामङ्घ्रिसरोरुहस्मरणतो नानाविधाः सिद्धयः
सिद्धिं यान्ति लघु प्रयान्ति विलयं प्रत्यूहशैलव्रजाः ।।

End :

हृद्यैः पद्यैः गुम्फिते सूरितोषेऽ-
लङ्कारार्व्ये जातके मञ्जुलेऽस्मिन् ।
वंशाध्यायः श्रीगणेशेन वृत्तैः
युक्तो वेदैः शैलसंख्यैः प्रणीतः ।।

Colophon :

इति श्री गणेशकविविरचितजातकालङ्कारे सप्तमोऽध्यायः समाप्तः ।।

178

Sl. No: 30548 जातकालङ्कारटीका Ms. No: C. 4662/17

Beginning :

व स्वर्णब्रह्मविद्यापरिचयचतुरं श्रीशुकं व्यासपुत्रं
नत्वऽऽचार्यं मुनीनां हरिपदकमले प्रेमविश्रामभाजाम् ।
स्विष्टेष्टं स्वेष्टदेवं श्रुतिसमाधिगतं माधवं भावयित्वा
भावैरुद्भाव्यतेऽस्मै प्रवरमतिमुदे जातकालङ्कृतश्रीः ।।

End :

श्रीमद्गुर्ककुले महीयसि यशःशुक्लीकृते जातके
आसीत्कृष्णदयाभरप्रमुदितः कृष्णो जयाद्यः कृती ।
तत्पुत्रेण विभाविताऽतिरुचिरा सज्जातकालङ्कृतिः
श्रीरेषा हरभानुना मतिमता मोदाय भूयाच्चिरम् ॥

Colophon :

इति श्रीमच्छुक्लोपनामकहरभानुभाविता जातकालङ्करटीका समाप्ता ।।

179

Sl. No: 30567 ज्योतिर्निर्णयः Ms. No: P. 6162/1

Beginning

× अन्धकं तदनु मन्दलोचनं
मध्यलोचनमधस्सुलोचनमू ।
रोहिणीप्रभृतिकं चतुष्टयं
साधुभिर्गणयेच्च पुनः पुनः ॥ (?)

End :

पूर्वाभाद्रा च षोडश्यां अश्विन्यां पञ्चमेव च ।
उत्तरा शतचोरा च अष्टादश इति स्मृतः ॥
आर्द्रा च हस्तनक्षत्रे एकविंशतिनाडिका ।
अनूराधा धनिष्ठा च श्रवणं दशमं तथा ॥

Colophon :

— — —

180

Sl. No : 30569 **ज्योतिर्निबन्धः** Ms. No: P. 8825

Beginning :

× अथ सप्तर्षिचारः । नारदः —
सैकावलीविराजतिससितोल्पमालिनी सहसैव ।
नाथवत्त्या च दिक् येकैर्भिस्सप्तभिर्मुनिभिः ।
ध्रुवनायकोपदेशा नरीनर्ति चोत्तरसमृद्धिश्च ।।

End :

संवत्सरमहोरात्रं ये जानन्ति मनीषिणः ।
तेषां तच्चुदयाज्ञानां इदं मनसि वर्तते ।।
इति तात्कालिकविचारः । अथ सूर्यक्ष्मर्क्षापनयनम् । सिद्धान्तशिरोमणौ–
सूक्ष्मं प्रवक्ष्येऽथमुनिप्रणीतं चिवाह × ×

Colophon :

इति ज्योतिर्निबन्धे संवत्सरप्रकरणम् ।।

181

Sl. No: 30570 **ज्योतिश्चरितम्** Ms. No : P. 7376/1

Beginning :

योगध्यानसमारूढं ब्रह्माणं त्रिजगद्गुरुम् ।
अभिवाद्य सुखासीनं नारदः परिपृच्छति ।।
देव देव जगन्नाथ सर्वज्ञ कमलासन ।
ज्योतिषां चरितं ज्ञानं ब्रूहि कालाश्रयं महत् ।।

End :

पर्यासं प्रतिदेहं तं दृष्टिः फेनादिसन्निभम् ।
ह्यावृत्तरूपमन्योन्यं रहाद्याकाश वर्तत ।
ज्ञानेन्द्रियं कर्मेन्द्रियं कर्माविद्यासु वर्मधीः ।।
पर्यटं × × × ×

Colophon :

— —

182

Sl. No : 30575 ज्यौतिषकल्पतरुः Ms. No : P. 8078/1

Biginning :

योऽन्तः प्रविश्यात्मजवश्यचित्तं
त्रैकालिकज्ञानयुतं करोति ।
तं देवदेवं वसुदेवसूनुं
प्रणम्य वक्ष्येऽखिलप्रश्नसारान् ॥

प्रश्नकथनादौ करणीयमाह —
विष्णुं विरिंचिं गिरिशं गणेशं
भास्वच्छशाङ्कादिखगान् मुनीन्द्रान् ।
वागीश्वरीं चात्मगुरुं प्रणम्य
प्रश्नान् वदे तानि कृतान् मनीषिम् ॥

End :

एवं बलाधिकश्चन्द्रो लग्ननाथो यतः स्थितः ।
दैवज्ञेन विनिर्णेयः प्रश्नस्तद्भावसंभवः ॥
+ + उभयोर्बल साम्ये भाव द्वयं वाच्यमिति ॥

Colophon :

इति श्रीकविचूडामणिविरचिते ज्योतिषकल्पतरौ वैदिकस्कन्धे प्रश्नसंग्रह कथनं नाम त्रयोदशोऽध्यायः ॥

183

Sl. No: 30583 ज्योतिषदर्पणम् Ms. No: P. 3024

Beginning :

× यः पतिमुमाकान्तां × कम् ।
नत्वा संग्रहान् रु × त्यान् ज्योतिश्शास्त्रप्रवर्तकान् ॥
अथ × × कोण्ड पुरेपुरि ।
× हांकाण्यबोधार्थं सम्यक्ज्योतिषदर्पणम् ॥

End :

ರೆಂಡು ಅಯನಾ ಯಿದನ್ನು ಈಗ್ರಾಹ್ಯನಿ ಶೋಧಿಂಪುಗ್ಗಾನು ಅಲ್ಪಮ್ಯನ
ರಾಶ್ಯಾದಿಕಂ ಯಿನು ಮಡಿಂಚಿತ ತಸ್ಮಾನಾಲಯತ್ತಿರಾಶಿಸ್ಥಾನಂ ಗೂಡಿ ಭಾಗಾದಿ —
ಮಗಾನ್ಯೈನ ಅಂಗುಲಾದ್ಯದುನ್ನ....ಮಾ,

ग्रहणं संपूर्णम् ॥

Colophon :

— — —

184

Sl. No. : 30596 ज्यौतिषफलरत्नमाला **Ms. No: P. 3738/1**

Beginning :

मेषाद्याः ग्रथिताः क्रमेण मुनिभिः प्रोक्तास्तथा राशयः
खेटाश्चामृडुकथ्यतेंऽशरविधिः पुंक्षेपतः कारकात् ।
पूर्वस्मिन् चरमाब्दवे ग्रहपरातंशक्रमेण द्विधा
भागिन्यास्तिरभे तदोभयग्रहैः पूर्वैः मुनीन्द्रैः कृतम् ॥

End :

मरणानि च दशान्ते क्षणयुक्ते राशितो दृगाणाद्वा ।
अथ तृतीयादशा —
स्फुटविश्लेषसंसिद्धो राशिवर्णोदयेष्यते ।
तत्रापि प्राणभेदेन मृतिलक्षणमीरयेत् ॥

Colophon:

इति ज्योतिषफलरत्नमालायां (श्रीबालत्रिपुरसुन्दरीकटाक्षसमधिगत समस्तविद्यावैदुष्यश्रीकृष्णमिश्रकृतौ) सप्तविंशोऽध्यायः ॥

185

Sl. No : 30598 ज्यौतिषफलरत्नमाला **Ms. No : P. 7442/1**

Beginning :

चतुर्थजामित्रगृहं चरित्रं
तथा स य प्रवलोकयन्ति ।
पूजे विलग्ने तु तदेव लग्नं
युग्मे × दन्यपुरुषस्य यो × ॥

End :

अत्र दशाप्रकरणे संक्षेपम् । सूत्रव्याख्यायां ज्योतिषकल्पलतायामस्म त्पुत्रेण सोमनाथमिश्रेण प्रकाशीकृतम् । तदपि दृष्ट्वा दशानिर्णयः कर्तव्यः ॥

Colophon :

इति ज्यौतिषफलरत्नमालायां ग्रन्थागमयुगादिलक्षणकथनं नाम अष्टा विंशोऽध्यायः ॥

186

Sl. No : 30602 ज्यौतिषरत्नमाला **Ms. No: P. 2182**

Beginning :

प्रभवविरतिमध्यज्ञानवन्ध्या नितान्तं
विदित × × यत्र ते योगिनोऽपि ।
तमहमिह निमित्तं विश्वजन्मात्ययाना-
मनुमितमभवन्दे भद्रहैकालमीनम् ॥

\+ + + +

दैवज्ञकण्ठाभरणार्थमेषा
विरच्यते ज्यौतिषरत्नमाला ॥

End :

इति ललितवृत्तां निर्मलां रत्नमाला-
मुदहरदधिकार्थां सद्गुणां रत्नकोशात् ।
निजगुरुपदभक्तः श्रीपतिः सद्गुणाढ्य
श्चतुरगणककण्ठे राजतामुज्वरश्रीः ॥

\+ + + +

सुवृत्तया श्रीपतिबद्धयाऽनया
कण्ठस्थिता निर्मलरत्नमालया ।
आलक्षणोऽप्यर्थपरच्युतोऽप्यलं
सभासु भूम्ना गणको विराजते ॥

Colophon :

इति श्रीपतिविरचितायां ज्यौतिषरत्नमालायां देवताप्रतिष्ठाप्रकरणं विंशतिकम् ॥

187

Sl. No: 30609 | ज्यौतिषरत्नाकरः | Ms. No: P. 2544/1

Beginning

× अथातः संप्रवक्ष्यामि नारीणां प्रथमार्तवम् ।
पृच्छकस्य च लग्नात्तु निधनस्त्रैविधो यदि ॥
पापग्रहे हिते युक्ते सा नारी दुः ×
× × मुक्तास्थिता यदा ॥

End :

युद्धे प्रविष्टे मरणं यदि स्यात्
स्वर्गप्रयातेत्युदितस्तु वेदे ।
युद्धे प्रविष्टे यदि जीवितःस्यात्
संपूजयार्घादियशांसि लेभे ॥
बला बलं च — उभयमिच्छता ॥

Colophon :

इति ज्योतिषरत्नाकरे युद्धयात्राविधिः समाप्तः ॥
[अथ गृहारम्भविधिः] (?)

188

Sl. No : 30613 | ज्यौतिषरत्नावलिः | Ms. No: P. 9287/5

Beginning :

रविनक्षत्रमारभ्य यावन्मध्याह्ननाडिका ।
सप्त हित्वाऽवशेषं तु तत्स्कन्धाद्विगुणीघटी ॥
रवेर्गगननक्षत्र ऋक्षसंख्यामगोनितम् ।
नदघ्नं नदिभिर्भक्तरात्रं स्याद्गगनाड्किम् ॥

End :

मनुष्यगणस्य —
स्वतन्त्रशीलो द्विजदेवभक्तः
सन्मार्गगामी निपुणो धनाढ्यः ॥
औदुम्बरीह्यस्थरतिप्रगर्भे
मनोहरो मानुषभे प्रसूतः ॥

राक्षस गणस्य —

क्रूरः कुमार्गः स्वजनेषु हीनः
अधर्मयुक्त्याविकृतिः प्रधानः ।
अतिप्रगल्भं पररन्ध्रदर्शी
समत्सरीराक्षसभे प्रभूतः ॥

Colophon :

— —

189

Sl. No : 30614 ज्योतिषलक्षणम् Ms. No: P. 8325/1

Beginning :

नमस्कृत्य महादेवं गुरुशास्त्रमिदं वरम् ।
भविष्यद्वर्तमानाया भविष्येऽहं पञ्चपक्षिणम् ॥
× × वक्ष्ये ज्योतिषलक्षणं ।
शाकुनानां क्रिया तत्वहयतयुद्धजयावहम् ॥

End :

वज्रेन्दुकन्दकुमुदस्फटिकप्रतारां
वैडूर्यशङ्खदधिपुष्पहिमोपमाम्भः ।
मुक्ताफलप्रकरतुल्यविशालकान्ति-
रेवंविधो भृगुसुतः शुभदो नराणाम् ॥

Colophon :

भृगुचारः समाप्तः ॥

190

Sl. No :30616 ज्यौतिषवृत्तशतकम् Ms. No: . 4308/1

अथ वृत्तशतकं लिख्यते —

ब्रह्मेशचन्द्रेन्द्रदिवाकराग्नि
वस्वादिरूपाणि सुरस्य यस्य ।
नत्वाऽच्युतं तं व्यवहारसिद्ध्यै
महेश्वरो वृत्तशतं करोति ॥

End :

आदौ त्याज्यविधिस्स्मृतोऽत्रभविधिःसंस्कारयुक्तो विधिः
उद्वाहोऽग्निपरिग्रहो गृहविधिर्भूपाभिषेकः क्रमात् ।
यात्रा गोचरसंक्रमादिकविधिर्देवप्रतिष्ठाविधिः
चक्रे वृत्तशतं मनोरथसुतो दृष्ट्वाऽन्यतः शास्त्रकृत् ॥

Colophon :

इति मनोरथोपाध्यायसूनुमहेश्वरोपाध्यायविरचिते ज्योतिषवृत्तशतके सुरप्रतिष्ठाप्रकरणं समाप्तम् ॥

191

Sl. No : 30624 **ज्यौतिषसारसंग्रहः** **Ms. No: P. 3738/4**

Beginning :

× लग्नाधिपो वा जालो वा शुक्रो वा यदि केन्द्रगे ।
यस्य पुत्रस्य दिर्घायुः धनवान् राजवल्लभः ॥
केन्द्रत्रिकोणेषु न यस्य तारा +
जीवस्य वत्सरशतं सरिमुक्तरोगाः ॥

End :

त्रिदिनेशे गते लाभे स्वक्षेत्रस्वोच्चकेऽपि वा ।
नरवाहनसम्पूर्ण योऽविजेयो भवेद्बुधः ॥
जामित्राधिपतौ केन्द्रे शुभयुक्ते निरीक्षिते ।
द्विभार्यायोगमाप्नोति जातो दीर्घायुरादिशेत् ॥

Colophon :

इति सारसंग्रहशास्त्रं सम्पूर्णम् ॥

192

Sl No: 30630 **ज्यौतिषसारसंग्रहः** **Ms. No: P. 4542/10**

Beginning

मेषकर्किंतुलानक्रः राशीनां च यथाक्रमम् ।
बाधकस्थानमित्युक्तं कुम्भगोसिंहवृश्चिकाः ॥

वाकेश्वरान्तराशेश्च बाधकस्थे शुभेतरे ।
स्थिते सति महाशोकं बन्धनं द्रव्यनाशनम् ॥

End :

नगरग्रामनाथं व पुत्रलाभं धनागमम् ।
कल्याणं भोगभाग्यं च सेनापत्यं महोन्नतिम् ॥
पाकेश्वरे जीवदृष्टे शुभराशिस्थितो यदि ।
तद्दशायां धनप्राप्तिः मङ्गलं पुत्रसम्भवः ॥

Colophon :

इति श्रीकेरलीयपराशरीये क्वचित्पुरं रामादीक्षितरचिते × सार-संग्रहे द्वितीये चतुर्थसंग्रहः ॥

193

Sl: No: 30665 ज्यौतिषसारावळिः Ms. No: P: 4704/A

Beginning :

मेषकर्कटचैत्रादौ येन वारेण युज्यते ।
मन्त्रीसस्याधिपो राजा स सूर्योदय × च ॥

End

सिद्धं सिद्धेति कार्याणि साध्यं साध्येति वा नरः ।
सुसिद्धं सर्वणादेन अरिमूलो निकृन्तनम् ॥

Colophon

३४ तमे पत्रे — श्रीमत्कुमारसूरिविरचिते ज्योतिषसारावळ्यां उपग्रहः समाप्तः ॥

194

Sl: No : 30670 ज्यौतिषसूत्राणि Ms: No : B. 54/1

Biginning ;

अथ ज्योतिस्सूत्राणि लिख्यन्ते —
पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम् ।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः ॥

ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यानुपूर्वशः ।
संमतं ब्रह्मणेन्द्राणां यज्ञकालार्थसिद्धये ॥

End :

इत्युपायसमुद्देशं भूयोऽप्यह्नः प्रकल्पयेत् ।
ज्ञेयराशिं गतान्यस्तान् विभजेत् ज्ञानराशिना ॥
सोमसूर्यक्षरचितं विद्वान् वेदविदश्नुते ॥
सोमसूर्यक्षरचितं लोकं लेके च सन्ततीम् ॥

Colophon :

— — —

195

Sl. No. : 30671 **ज्योतिषसूत्रभाष्यम्** **Ms. No: B. 54/2**

Beginning :

प्रणम्य शिरसा कालं अभिवाद्य सरस्वतीम् ।
सूत्रभाष्यं प्रवक्ष्यामि लगताख्योऽहमादरात् ॥

पञ्चेति । शुचिः वाङ्मनःकायशुद्धः अहं ब्रह्मज्योतिषां सूर्यचन्द्रनक्षत्राणां अयनं गमनं प्रवक्ष्यामि कथयामि ॥

End :

किञ्च लोके इह च संततं संततिं अनवच्छिन्नां सन्तानसिद्धिं च प्राप्य परत्र स्वर्गादिलोकवान् भवतीत्यर्थः ॥

Colophon:

ज्योतिषसूत्रभाष्यं समाप्तम् ॥

196

Sl. No : 30 675 **ज्योतिषार्णवः** **Ms. No : P. 2294**

Beginning :

प्राप्तानर्घ्यं × यो माया
कोशमुखप्रचण्ड चि
तेनोऽथ पा मनिषत्काल
यन्ते भूरि जगत्पतेः कान्ताः ॥

End :

ग्रामस्य निकटे नूतं दिनत्रयं शत्रुतो भयं अपेतो विशति ग्राम मा ×
×पि तच्छून्यः चिरादभयं छ्टें पट्टे च कर्नाटे तोण्डे चोद्रलेन्पौण्डके केरले
कल × यत्र भवन्तिः अलेपाक्तविधिना सम्यक् श्रृतिं कुर्युं ×

Colophon :

इति ज्योतिषसंहितार्णवः सम्पूर्णः ॥

197

Sl. No : 30677 ज्योतिषार्णवः Ms. No : P. 2433

Beginning :

बलभद्रदास × द्विपुराविर × ।
श्रीकपिलेश्वराद्गजपतेः तत्तत्प्रसङ्गे मुदा ।
× तस्या गर्भसुधाम्बुधौ समुदित ×
समनिशं कल × मत्तृतीय ×
तस्मात्सारं गृहीत्वा मृदु पदरचितं ज्योतिषं वच्मि यत्नात् ।।
तत्र तावदेतच्छास्त्रं . ×

End :

× नुस्थस्सुतराजमन्त्रि
साम्यास्सितोत्यन्तबलीय × ॥
दोषान् समस्तान् ग्रहजान्निहन्ति
यथा हरेः संस्मरणं त्वमोघम् ।
हन्त्यर्थहीनत्वमरप्रतिष्ठा ×

Colophon :

(द्वादशतमतरङ्गसमापनवाक्यं यथा--९३तमे पत्रे) ॥ इति श्रीमहा
राजाधिराजप्रतापरुद्रदेवगजपतिपादारविन्दषट्पदायमानमानसेन सकलविद्वज्जन
चरणपरिचरण सम्पादित × भण्डारकधूर्तकर्तर्यादिविविधबिरुदविदिनेन
विश्वेश्वरमहाप्रसादिसुतेन कदम्बेश्वराह्वयास्थानमहाप्रसादिनस्सुतेन सूनृतवादिना
विरचिते ज्योतिषसंहितार्णवे वास्तुनिरूपा × नाम द्वादश ×

198

Sl. No : 30679 ज्योषर्णवः **Ms. No: A. 578**

Beginning :

कस्तूरिकामसृणकर्दममेचकाङ्घि
पुत्रीपृथून्नतपयोधरशङ्कयेव ।
नीलाचलोपरि निरन्तरकेळिलोलं
नीलं महः किमपि निर्मलमाविरास्ताम् ।।

End :

सार्द्रे त्यक्त्वाऽन्यधिष्ण्येषु सुराणां स्थापनं शुभम् ।
कुजवारं विना सर्वे वाराः शुभफलप्रदाः ।।

× × ×

Colophon :

२०६ तमपुटे —

इति श्रीमहाराजाधिराजप्रतापरुद्रदेवगजपतिपादारविन्दषट्पदायमानमानसेन सकलविद्वज्जनचरणपरिचिणसम्पादितप्रज्ञाविभवेन विश्वेश्वरमहाप्रसादिसुतेन कदम्बेश्वरास्थानमहाप्रसादिना विरचिते ज्योतिषसंहितार्णवे गृहप्रवेश निरूपणं नाम चतुर्दशस्तरङ्गः ।।

199

Sl. No: 30681 ज्योतिषर्णवः **Ms. No : P. 7030/1**

Beginning :

पूर्णेन्दुकोटिसदृशं निर्मलं निरुपद्रवम् ।
नञ्जुण्डनामविख्यातं वन्देऽहं जगतां पतिम् ।।
अतःपरं प्रवक्ष्यामि सङ्क्रमस्य फलाफलम् ।
एवमेव प्रशंसन्ति बहुधा च विचक्षणाः ।।

End :

तेषां सम्पत्प्रदं सद्यः भविष्यति न संशयः ।
सर्वरोगप्रशमनं सर्वसङ्कटनाशनम् ॥
राजप्रसादमूलेन सर्वैश्वर्यप्रदायकम् ।
पुत्रपौत्रादिसन्तोषं लभते नात्र संशयः ॥

Colophon :

इति ज्योतिषार्णवे ब्रह्मनारदसंवादे मकरसंक्रान्तिदेहसौन्दर्यवर्णनातिशय नाम सप्तत्रिंशोऽध्यायः ॥

200

Sl. No: 30685 ज्ञानदीपिका Ms. No : P. 611/1

Beginning :

ओंकारादिसमस्तमंत्रपदवीगम्यं पुरा दानवं
सि × मग्नदैत्यसहितं वेदापहारोन्मुखम् ।
हत्वा तज्जड × × ×
पायाद्वः कमलामुखाब्जमधुपो मत्स्यावतारो हरिः ॥

End

इत्यनेनोपदेशेन सत्यं वक्ष्यामि सारतः ।
ज्ञातव्यं देशिकेन्द्रेण यदुक्तं सूचनाक्रमम् ॥

Colophon :

इति ज्ञानदीपिका समाप्ता ॥

201

Sl. No ; 30687 ज्ञानदीपिका Ms. No : P. 66/19

Beginning

श्रीमद्गङ्गाधरसुतं चन्द्रलेखावतंसिनम् ।
सिद्धिदं सर्वविद्यानां वन्दे दन्तावलाननम् ॥
ज्ञानप्रदीपिका नाम शास्त्रं लोकोपकारकम् ।
प्रश्नादर्शं प्रवक्ष्यामि सर्वशास्त्रानुसारतः ॥

End :

द्वितीये वा तृतीयें वा शुक्रश्चन्नौ समागमः ।
अनेनैव क्रमेणैव सर्वं वीक्ष्य वदेत् स्फुटम् ।।
अधिकारं च षाण्मासं चण्डालः कोटिजन्मसु ।
सूर्योदयात् परस्ताच्चेत् कलामात्रं दिनद्वये ।।
एकादशी द्वादशी च वर्तते व्रतमुत्तमम् ।
[राहुवेगे कन्ये स्वक्षेत्र] × ×

Colophon :

इति ज्ञानप्रदीपिका समाप्ता ।।

202

Sl. No : 30688 ज्ञानप्रदीपिका **Ms. No : P. 816**

Beginning :

श्रीमद्गङ्गाधरसुतं चन्द्रलेखावतंसितम् ।
सिद्धिदं सर्वविद्यानां वन्दे दन्तावलाननम् ।।
ज्ञानप्रदीपिका नाम शास्त्रं लोकोपकारकम् ।
प्रज्ञादर्शं प्रवक्ष्यामि पूर्वशास्त्रानुसारतः ।।

End :

ब्रह्मणोऽनुग्रहस्तेषां अपि ग्रामशतैरिह ।
ज्ञनप्रदीपिकाशास्त्रं सर्वेषाममृतोपमम् ।।
एतच्छास्त्रस्य निपुणः न भूतो न भविष्यति ।।

Colophon :

इति ज्ञानप्रदीपिकाशास्त्रं सम्पूर्णम् ।।

203

Sl. No : 30695 तन्त्रप्रकाशः **Ms. No: P: 2559/5**

Beginning :

नत्वा तां परदेवतां गुरुमतामाकल्पकल्पद्रुमा
कालान्माकलिवासिनीं कमलजोपेन्द्रादिदेवार्चितान् ।

श्रीनाथोऽयमनेकभेदविषमान् दृष्ट्वा सुसिद्धान्तकान्
ज्योतिर्ज्ञानविधायनप्रियकरं तन्त्रप्रकाशं ब्रुवे ॥

End :

आत्रेयसद्वंशसुधाब्धिचन्द्रः
श्रीसूर्यवज्ज्योतिवि × प्रगण्यः ।
श्रीनाथ इत्य × मा हेमाद्रिमध्ये
रेजे नृसि × तिवस्य × ॥

Colophon :

इति तन्त्रप्रकाशे शृङ्गोन्नत्यधिकारोऽष्टमः । तन्त्रप्रकाशस्समाप्तः ॥

204

Sl. No: 30697 तत्त्वमुक्तावली: Ms. No: C. 4050/1

Beginning :

प्रचण्डकरदण्डाग्रविघ्नखण्डनपण्डितम् ।
अलिपिण्डलसद्गण्डं वक्रतुण्डमुपास्महे ॥
इन्दिरामन्दिरं कञ्चिदिन्दीवरसहोदरम् ।
गोपीमुखारविन्दानामिन्दिरेशमुपास्महे ॥

End

उपवासाक्षमाविष्टः प्राक् पश्चादाभुजिं चरेत् ।
पूजानाद्यपि तत्रैव प्राक्भुजेः सर्वमाचरेत् ॥
वारो यथास्तिथो ग्राह्योऽसंशयादिति माधवः ।
वस्तुतस्त्वस्य होरायां तत्कर्तव्यं प्रवर्तयेत् ॥

Colophon :

— — —

205

Sl. No ; 30698 तत्त्वमुक्तावलीव्याख्या Ms. No ; C. 4050/2

Beginning

पर्वदध्नान्विघ्नोपघ्ना स्वलीलया घ्नन्तम् ।
विश्वाराधितचरणं शरणं करवाणि वारणं कञ्चित् ॥

अङ्कपल्यङ्कशायि श्रीदर्पणीकृतकौस्तुभम् ।
श्रीवक्षोजार्पितकरं वन्दे श्रीबिन्दुमाधवम् ॥
प्रारीप्सिते निर्विघ्नतासिध्यर्थमादौ मङ्गलमाचरति —

प्रचण्डः प्रगल्भो यः करदण्डः तस्याग्रं पुष्करं । तेन विघ्नानां खण्डनं तत्र पण्डितः कोविदः ॥

End :

वारे संशयाभावाद्यथास्ति स एव ग्राह्य इति माधवः । तदाह वसिष्ठः—
वारप्रवृत्तिविज्ञानं क्षणवारार्थमेव हि ।
निखिलेष्वन्यकार्येषु वारे रव्युदयाद्भवेदिति ॥ ×
श्रीनन्दपण्डितसुतो वेणीऽदत्तोऽर्थतत्त्ववित् ।
तत्त्वमुक्तावलीव्याख्यां बालभूषां व्यधादिमाम् ॥
नत्वा मुक्तावलीव्याख्या बालभूषा कृता मया ।
बाललीलाधरः कृष्णः प्रीयतामनया मयि ॥

Colophon :

इति श्रीधर्माधिकारिनन्दपण्डितात्मजवेणीपण्डितकृता तत्त्वमुक्तावली व्याख्या बालभूषा समाप्ता ॥

206

Sl. No: 30702 **ताजकम्** **Ms. No: P. 6723**

Beginning :

प्रणम्य हेरम्बमथो दिवाकरं
गुरोरनन्तस्य तथा पदाम्बुजम् ।
श्रीनीलकण्ठो विविनक्ति सूक्तिभिः
तत्ताजिकं सूरिमनःप्रसादकम् ॥
प्रमांश्चरोग्निः + नृपस्समोजः ॥

End :

पद्माम्बया सेविततो विपश्चित्
श्रीनीलकण्ठः श्रुतिशास्त्रनिष्ठः ।
विद्वच्छिवप्रीतिकरं व्यधात्स
संज्ञाविवेकं सहमावतंसम् ॥
पश्चालेपानष्टवीर्या . . . ताजिकोक्तं ज्ञेयम् ।

Colophon :

ताजिकं सम्पूर्णम् ॥

207

Sl No: 30705 ताजिकतन्त्रव्याख्या Ms. No: P. 1147

Beginning

भक्तिभक्तेजनस्य यस्य भवतिः प्रीतिः प्रतीतिप्रदा
× सारा परिणतसर्वाभिलाषप्रदः ।
सोऽयं सर्वसुरासुरासुरेन्द्र × शस्तस्तु लम्बोदरो
धीरो दुर्जनविघ्नतर्जनपरः श्रेयस्करो नः सदा ॥
तूर्णं यत्करुणाकटाक्षकणिकासम्पूर्णसिद्धिर्भवे-
त्तां वाणीं प्रणिपत्य सत्यनिरतं श्रीदुण्ढिराजं गुरुम् ।
सारं ताजिकवारिधेर्निरवधेः प्रोद्धृत्य पीयूषवत्
कुर्वे ताजिकभूषणं गणपतेर्भक्तो गणेशः सुधीः ॥

End :

एतत्ताजकभूषणं सुगुणकप्रीत्यै चकारदरात्
आ . . . कृतिर्गणेश गणकः श्रीदुण्ढि राजात्मजः ।
श्रीमद्देवगिरीशविलसद्गोदावरी × री
तीरे पार्थपुरं × × ॥

Colophon :

इति श्रीदुण्ढिभैरवात्मजगणेशदैवज्ञविरचिते ताजकभूषणे सहजभाव फलाध्यायः]

. इति श्रीदुण्ढिराजात्मजगणेशदैवज्ञरचिते ताजकभूषणे भोजनचिन्ताविचारः ॥

208

Sl. No: 30706 ताजकतन्त्रव्याख्या Ms. No: C. 853

Beginning

हेरम्बं भुवनस्थशीर्षमधुलिट्संसक्तपादाम्बुजं
गौरीहृत्कमलप्रकाशतरणिं विप्राटवीयावकम् ।
दृप्यद्वैरिकुलान्तकं सुमनसां श्रीसिद्धिवुद्धिप्रदं
सिन्दूरारुणगण्डयुग्ममनिशं भालौषधीशंभजे ॥
× माधवः × पितामहकृते सत्ताजिके व्याकृतिम् ॥

End

एवं ताजके भावाः दशाः एकस्याङ्कस्य १ वर्षे २ एकोमासः । एवं प्रथमावरणं भवति । घनं घनादि । एवं मासप्रवेशं विधाय भावं विचार्य, एवं फलम् × ×

Colophon :

— — —

209

Sl. No : 30707 ताजकतन्त्रव्याख्या Ms. No : C. 3870/2

Beginning

चण्डीकुण्डलमाकलय्य कुतुकाद्दण्डाभशुण्डाग्रगं
कृत्वा ताण्डवडम्बरे पशुपतेः खेलत्खलच्छृङ्खलम् ॥
चण्डांशोरिव मण्डलं तदपरं सन्दर्शयन्नम्बरे
हेरम्बो जगदम्बिकां विहसयन्वः श्रेयसे गर्जताम् ॥
× नीलकण्ठः तत्ताजिकं तत्पूर्वाचार्योक्तं ताजिकं सूक्तिभिः सयुक्तिभिः ×

End :

संज्ञाविवेकं संज्ञाविचारं ग्रन्थं व्यधात् कृतवान् । कथंभूतं सहमावतंसं सहमनिरूपकशास्त्रमवतंसः भूषणं यस्य तम् अत्र ग्रन्थे सहमविचारं सम्यङ् निरूपितवान् । पुनः कथं भूतं विद्वच्छित्रप्रीतिकरं पण्डितश्शिवस्य प्रीतिदम् ।

Colophon :

इति श्रीदिवाकरदैवज्ञात्मज विश्वनाथदैवज्ञविरचिते श्रीनीलकण्ठज्योतिर्वित्कृतसंज्ञातन्त्रे सहमाध्यायस्य व्याख्योदाहृतिः समाप्ता ॥

210

Sl. No: 30710 **ताजिकसारः** Ms.No: P. 5153/1

Beginning :

श्रीमद्वेङ्कटनायकं हृदि विभुं नत्वा रमावल्लभं
विघ्नेशं शरदिन्दुकुन्दधवलां वाग्देवताम्बिकाम् ।
लोकानां स्थितिसंयमोद्भवविधौ भान्विन्दुमुख्यान् ग्रहान्
यं सर्वे सकृदेव जन्मविलयैस्संयान्ति पारम्पराम् ॥
\+ सुलभं शास्त्रप्लवं प्रारभे
श्रीमत्काश्यपवंश + श्रीवेङ्कटनायकः +
× तन्त्रत्रयं ताजिकशास्त्रसारे ॥

End :

लग्नपञ्चमनाथाभ्यां परस्परयुतेक्षणात् ।
राजपूज्यं महत्सौख्यं बुद्धिवैशद्यमेव च ॥
मित्रलालनसन्तोषं मित्रे मित्रेऽन्यथा वदेत् ।
लग्नषष्ठेशनाथा × ×

Colophon :

[इति ताजिकसारे वर्षचर्यामासचरीफलकथनं नाम दशमोऽध्यायः]

211

Sl. No : 30733 **तिथिचक्रम्** Ms. No : P. 2559/6

Beginning

नत्वाऽऽदौ शिरसा सूर्यं त्रिपुरारिरहं सुधीः ।
तिथिचक्रं लघुचक्रं प्रवक्ष्येऽभिनवाह्वयम् ॥
शरग्न्यर्को १२३४ चितशाके सूर्यघ्नो १५ मासयुक् पृथक् ।
त्रिघ्नति १८३ भौग्धिबाणाङ्कशरैः ५ नि ५४ राप्तोऽधिमासयुक् ॥

End :

श्री × अस्मिन्नवतिथिचक्रं कृतमिति निपुणेन दैवविदा ।
त्रिपुरारिणास्य मूलं यो जानाति जानतां त्रिको लोके ॥

Colophon :

इति चतुरगणकत्रिपुरारिकृताऽभिनव × समाप्तम् ॥

212

Sl. No : 30734 तिथिचक्रम् Ms. No : P. 2588/3

Beginning

तिथिचक्रम् —

श्रीमत्सुरासुराध्यचरणाम्बुरुहद्वयम् ।
चराचरयुगधात्रीं चण्डिकां प्रणमाम्यहम् ॥
सर्वज्ञनागयार्यस्य तनयो मल्लिकार्जुनः ।
तिथिचक्रं स्फुटं वक्ष्ये गणकाभीष्टसिद्धये ॥

End :

पञ्चाङ्गं प्रतिपत्तिथौ स्मृतियुतौ पादेन युक्पञ्चमी
नक्षत्रे गुणचन्द्रयुग्युगमिते योगेन्द्रन्यूनत्रये ।
वारस्योपरि वारवस्तु निशितं सिद्धान्तसाम्यं स्फुटं
यावत्सूर्यशशाङ्कतारकगुरौ तावद्ध्रुवं तिष्ठति ॥

Colophon :

— — —

213

Sl. No : 30762 तिथ्यावलिः Ms. No : P. 4434

Beginning

ತಿಥ್ಯಾವಲಿ ಬರೆವುದಕ್ಕೆ ಶುಭಮಸ್ತು.
तिथ्यावळी × खगैस्समेतम् ॥

× × × ति

तिथ्यादिभागेषु समीपशाकं
निजाधिपास्यात्र शकं च शेषम् ।
कोठेतिथिर्वारमुखश्च मान्दः
योज्यं समं पञ्चशाकाच्च भोगः ॥

End

तदागतिः स्यात्कलिकादिकोऽयं
दिवाकरस्याङ्कशरा गजाश्च ।
इन्दोः खगोस्वाशरवह्नयश्च
क्षोणिगुणा × अमलाः ×
+ + + +
शाके निजे पोस्तुकशाकहीनः
शाखादयस्थास्तिथिवारवल्यः ।
शेषादयस्थासितिथिवारवल्यः
एकीकृतास्तास्तु ततोदयः स्यात् ॥

Colophon :

— —

214

Sl. No: 30772 त्रिंशद्योगावलिः Ms. No : P. 1804/20

Biginning :

उमासुतं नमस्कृत्य अंरौहं हंसवाहिनीम् ।
योगानन्दगुरुं वन्दे परमानन्दरूपिणम् ॥
श्रीवत्सगोत्रोद्भवग्रन्थकर्ता
+ + + +
नृसिंहनामा शिवशास्त्रवेत्ता ।
सिद्धान्तशास्त्रे बहुधा समर्थः
योगावलीं जातकभाववहर्ता ॥

End :

स्मरलग्नाधिपे चन्द्रे अन्त्यांशादन्त्यराशिगे ।
अन्त्येश्वरेण संदृष्टे साहचर्यं न संशयः ॥
योगे साहचर्यके जातः साकारी सूर्यपूजितः ।
सत्यशीला भवेच्छ्रेष्ठा पातिव्रत्यशिमरोणिः ॥

Colophon:

इति नीलकण्ठात्मिकनृसिंहज्ञानविरचिते परहितार्थपरोपकारार्थं त्रिंशद्योगावली समाप्तिमगमत् ॥

215

Sl. No. : 30783 **त्रिप्रश्नोदाहरणम्** Ms. No: C. 3830

Beginning:

अथ त्रिप्रश्नोदारणम् । तत्र तावन्मेषादिराशीनां स्वोदयानाह ।
लङ्कोदया इति । लंकोदया विघटिकाः पलात्मकाः स्युः ।

End :

उक्तं च सिद्धान्तशिरोमणौ —
दर्शयेद्दिवि चरं दिविके वा
नेह सिन्धुचरदर्शनयोग्ये ।
पूर्वमेष विरचय्य यथोक्तं
रंजनाय सुजनस्य नृपस्य ॥

Colophon :

इति श्रीदिवाकरदैवज्ञानविश्वनाथविरचिता ग्रहलाघवस्थलग्नादिछायायन्त्रभागादिसाधननिबन्धाधिकारस्योदाहृतिः ॥

216

Sl. No: 30785 **त्रैलोक्यचिन्तामणिः** Ms. No : P. 7410/2

Biginning ;

आसन्नप्रसवे मासि सूतिकागारमारभेत् ।
चन्द्रपौष्णकरादित्यरोहिणीमैत्रवायवः ॥

उत्तरालयचित्ताश्विश्रवणासु सुपूजिताः ।
रिक्तपर्वाष्टमी बन्ध्या शेषास्तु तिथयः शुभाः ॥

End :

पापं गतो वा यदि भोगिनाथे
प्रणाममूर्ध्वा च भवेन्नरस्य ।
स्ववन्धुवर्गैरपि पीडितात्मा
देशप्रियोऽकल्मषवृत्तिरस्य ॥
इति केन्द्रभावः ॥

Colophon :

इति त्रैलोक्यचिन्तामणिद्वादशभावफलं सम्पूर्ण ॥

317

Sl. No : 30829 दशाफलम् Ms. No : P. 5462

Beginning :

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरमहं किञ्चिद्वीणाधरमुपास्महे ॥
वयं पाराशरीं होरामनुसृत्य यथामति ।
फलानि नक्षत्रदशाप्रकारेण विवृण्महे ॥

End :

दशादौ सुखमाप्नोति दशामध्ये महद्भयम् ।
दशान्ते राजभीतिः स्यात् देहनाशमथापि वा ॥
\+ + + +
पापेक्षितयुतो वापि × करोति च ।
ज्वरातिसारमेहं च त्वग्दोषं चोरपीडनम् ॥
केतोर्दशा समाप्ता ॥

Colophon :

केरळदशा समाप्ता ॥

218

Sl. No. : 30847 **दशाफलम्** **Ms. No: B. 576/22**

Beginning :

सूर्यादिमहर्दश वर्ष ९।१ केवल ।
राजशत्रुभयं मृत्युरर्थहानिः पशोर्मृतिः ।
अक्षिरोगः शिरोरोगः सूर्यस्यादिदशाफलम् ॥
सूर्यन्तर्दशमास ३ दिन १ केवल ॥
तुङ्गरोगो गुल्फरोगो मूत्रकृच्छ्रातरं तथा ।
वातपित्तकफश्चैव न्तरवेरर्दशाफलम् ॥

End :

नरस्याप्तफलं विन्द्यात् एतत्सूक्ष्मदशाफलम् ।
सूक्ष्मा च विघटीकृत्य विघटिं स्वदशाहृतम् ॥
नरस्याप्तलं विन्द्यात् एतत्प्राणदशाफलम् ।
दवां दबाहृता कृत्वा सर्वायुःसंख्यया हरेत् ॥

Colophon:

श्री कृष्णार्पणमस्तु ॥

219

Sl. No : 30853 **दशाफलम्** **Ms. No : A. 837/4**

Beginning :

जय त्वं देवि चामुण्डे जय भूतापहारिणि ।
जय सर्वगते देवि भद्रकालि नमोऽस्तु ते ॥
अथ रव्यादिग्रहाणां महर्दशा विलिख्यन्ते ॥

End :

ಪ್ರಶ್ನಕ್ರಮದಲ್ಲಿ ಕೇತುಬಂದರೆ ಅವನನ್ನ ಕುಜನನ್ನಾಗಿ ಮಾಡಿಕೊಂಡು ಪ್ರಶ್ನೆ-
ಯಲ್ಲಿ ಕುಜನ ಶರೀರಿಯಿದ್ದರೆ ಅವನ ಕೆಳಗಡೆಯಲ್ಲಿ ಅವನಿಲ್ಲದಿದ್ದರೆ ಅವನ ಸ್ಥಾನ
ದಲ್ಲಿಯೇ ಸೇರಿಸಿಗೊಂಡು ಆ ಕೇತುವಿಗೆ ಕುಜನಂತೆ ಪ್ರಮಾಣವಂ ಹೇಳತಕ್ಕದ್ದು ॥

Colophon :

ಶ್ರೀಮದ್ರಾಜಾಧಿರಾಜಮಹಾರಾಜ ಶ್ರೀಕೃಷ್ಣರಾಜಕಂಠೀರವರಿಂದ ಲೋಕೋಪ-
ಕಾರಾರ್ಥವಾಗಿ ವಿರಚಿತವಾದ ನವಗ್ರಹದಶಾವಿಭಾಗಪದಕ ಸಂಪೂರ್ಣ ॥
ತ್ರಿಭುವನಭೀಷಣಶುಂಭನಿಶುಂಭ ... ಮಂಗಲಮಹಾ ॥

220

Sl. No: 30854 **दशाविभागफलम्** Ms. No: P. 2590/6

Beginning :

श्रीमद्गुरूणां चरणारविन्दं
यत्सर्वविज्ञाननिदानदीपम् ।
नत्वेह दुण्डीगणपुंसजातकं
श्री शम्भुनोक्तं लिखतीह पट्टके ॥
अर्कश्चन्द्रः कुजः सौम्यो जीवः शुक्रतमः शनिः ।
केतुर्नवग्रहा एते पान्तु नो दुरितापहाः ॥

End :

विदेशगमनम् । बन्धुद्वेषः सङ्गः सुहृद्वधः ॥
स्ववंशनाशमाप्नोति शुक्रस्यान्तर्गतागतम् ॥
अत्र नसदंतशिरोव्यथा । कमलरोग ॥
अङ्गे क्षीणता क्लेशः । नैरृत्यदिक्तो हानिः। नीचाद्भयम् ।
हानिवाचि ॥

Colophon : .

— — —

221

Sl. No: 30859 **दामोदरीयम्** Ms. No: P. 9942/2

Beginning :

अथ सौम्यायते कार्ये नववेश्मप्रवेशनम् ।
राज्ञां यात्रानिवृत्तौ वा यद्वा द्वन्द्वप्रवेशनम् ॥
विधाय पूर्वदिवसे वास्तुपूजां बलिक्रियाम् ॥

End :

नेच्छन्ति स्थिरभोदयं कलितिथिं शस्त्राहतस्योत्तमं
भाष्यन्ते यमवासरं यमतिथिं चानिष्टमेके बुधाः ।
चित्रामैत्रमघाबृहस्पतिमरुच्चन्द्रार्कविष्णुलये
श्राद्धं कर्तुयशोविवर्धनमिदं पुत्रार्थसम्पत्करम् ॥

Colophon :

इति श्राद्धपटलः ॥ इति दामोदरीयं समाप्तम् ॥

222

Sl. No ; 30860 दायप्रकाशः Ms. No ; P. 852/1

Beginning

मार्ताण्डं प्रणमामि सर्वजगतां ईशं प्रभुं शंकरं
सर्वेषां हृदि संस्थितं पशुपतिं भर्ग भवानीपतिम् ।
लोकानां प्रलयोदयस्थितिभुवां त्रैलोक्य दि × क ×
वक्ष्याम्यस्य मदेश्वरस्य कृपया दायप्रकाशं शुभम् ॥

End :

तद्दोषपरिहारार्थं केतुप्रीतिकरं शुभं ।
आयुर्वृद्धिकरं चैव अपमृत्युविनाशकृत् ॥
शुक्रदशाफलं संपूर्णम् —

Colophon :

वृद्धपराशरग्रन्थं संम्पूर्णम् ॥

223

Sl. No : 30879 केरळज्यौतिषम् Ms. No: P. 7372

Begininng :

× गोधनमित्रलाभं स्वस्थान
याना × सौख्य × ॥
स्वक्षेत्रकस्यापि रवेर्दशायां
स्वबन्धुसौख्यं कृषिवित्तलाभम् ।
राजाश्रयात् गोधनमित्रसौख्यं
विद्यायशःप्राप्तिदराजपूज्यम् ॥

End :

उच्चस्थिता चेदपि नीचभागे
ग्रहा न कुर्वन्ति तथैव भाग्यम् ।
ग्रहा बला × वृष × के
स्वोच्चस्थिता पूर्वविभागके स्यात् ।
तद्वत्स्वयं पश्चिमभागयुक्ता
मित्रस्थितश्चेदुभयत्र भाग्यम् ॥ ×

Colophon :

पुट – २११
इति केरळीये नवमोऽध्यायः ।
पुट – २३९
इति केरळीये द्वादशोऽध्यायः ॥

224

Sl. No 30854 **दैवज्ञचूडामणिः** Ms. No. A. 803

Begginning :

प्रणम्य लक्ष्मीपतिपादयुग्मं
गीर्वाणचूडामणिकान्तियुग्मम् ।
लिखामि नानाविधसंहितार्थं
दैवज्ञचूडामणिनामधेयम् ॥
गर्गजीववसिष्ठादीन्नत्वाऽऽचार्यान्प्रणम्य च ।
निषेकस्य विधिं वक्ष्ये धर्मसंततिवृद्धये ॥

End :

तृतीयपञ्चसप्ताय कर्मणो वा निशा (दिवा) करः
लग्नात्करोति सम्बन्धं दम्पत्योर्गुरुवीक्षितः ।
तुलागोकर्किलग्नस्थाः × सुसंयुताः
वीक्षिताः पृच्छतां नृणां कन्यालाभकरास्तथा ॥

Colophon :

— — —

225

भवन्ति भववाराशेः ये सुखोत्तारसेतवः ॥
पुरातनाचार्य समीरितागमान्
विचार्य तद्वाक्यशतैः संमर्थयन् ॥
उदीरितं चानुदितं समर्पयन्
इमां विधत्ते सुमुहूर्तदीपिकाम् ।
सहदेवी यवात्याध्रीं बला चातिबला तथा ।

End:

पञ्चोषध्यः प्रशस्यन्ते स्नानादिषु च कर्मसु ॥
पलाशाश्वत्थकापीत बिल्वोदुम्बरपल्लवाः ।
पञ्चभृङ्गा इति ज्ञेयाः देवानां च हितावहाः ॥
इति ब्रह्मादयस्तथादेवस्तीथीनि ॥

Colophon :

— — —

315

Sl. No: 32112 मुहूर्तदीपिका **Ms. No : P 9626/3**

Beginning :

भवत्यश्विनीनक्षत्रं आश्वींघसंतुरंगमः ।
आद्यस्तुरंगस्तुरगः अश्वोवाटीह योहयः ।
भरणी स्यद्यमोयाम्यस्त्वन्तकोयम संज्ञिकः ।
कृत्तिकाबहुलाज्ञेया हुतभुग्वह्नि संज्ञिका ।

End :

प्रागादौ शनिवासरादिगदिताः सूर्यादयोष्टौ ग्रहाः ।
नागानागनगाधिनिशिनभो नाड्यानेन सोनादिकाः ।

हानिप्रीतिदुरुक्तिबन्धुकनकस्निग्धान्नपापाथिदाः
श्रोतुः क्रोष्टु ऋते सुते फलमिदं मृत्युस्सदा गोक्षुतम् ।

Colophon :

— — —

316

Sl. No 32113 **मुहूर्तदीपिकः** **Ms. No. C. 3835/a**

Beginning :

णप्रम्यैकरदं देवं शारदां गुरुमेव च ।
मृहूर्तदीपकं कुर्वे बालाज्ञानतमोऽपहम् ॥

नन्दाभद्राजयाख्याः प्रतिपदभिमुखारिक्तिकाः स्युश्च पूर्णाः संज्ञा-तुल्यार्थकृत्या भृगुविदवनिजार्कीज्यवारेषु सिद्धाः । स्त्रीसेवाक्षौरतैलामिषम-शुभममाभूतषयष्टमीषु स्नानं नानाक्षिविश्वैः परिमिततिथिषु त्रिशंदका द्रितुल्ये ॥ २ ॥

End :

आद्यानामनवद्यपद्यरचनानानाविचिंन्त्यात्मना
लोकानां व्यवहारदर्शनविधौ सप्तेषुवृत्तैः स्फुटम् ।
श्रीमद्देवतराजपूजितपदः श्रीकाहजिद्धाडवः
सूनुस्तस्य मुहूर्तदीपमकरोदेनं महादेववित् ॥

Colophon :

शाके रामगजेषुभूपरिमिते (२५८३) सौम्यायने भास्करे चैत्रे मासि सिते दले शिवतिथौ वारे विधौ भास्करे व्याघाते युजि वाणिजे च करणे श्रीमद्भुजे पत्तने लेखित्स्वायमुहूर्तदीपकभवाख्यानं महादेवकः ॥

इति श्री महादेव भट्टविरचिते मुहूर्तदीपकः सटीकः समाप्तः ॥

317

Sl. No: 32124 **मुहूर्तपदवी** **Ms. No: P. 6087/15**

Beginning :

प्रत्यूहप्रतिहन्तृ किञ्चनमहः संञ्चिन्त्य भाषनिधिं
भानुं च क्रियते मया मुहूर्तपदवीं संक्षिप्तशास्त्रान्तरा ।

वर्ज्यावर्ज्यविवेचनीकृतसदाचारानु सारा मया ।
सन्तुष्यन्तुतरां चिराय सुधियो देवाः प्रसीदन्तु वः ॥

End :

अजवृष मृगाङ्गना कुलीर
झषवाणिजौ च दिवाकरादि तुङ्गा ।
दश शिखि मनुयुक् तिथीन्द्रियांशै
त्रिनवक विंशति भिश्च तेस्तनीचा ॥

Colophon :

— — —

318

Sl. No : 32125 **मुहूर्तपदवीव्याख्य** **Ms. No : A. 782**

Beginning :

श्रीमद्गुरोश्चरणमाश्रितकामपूरम्
व्यासं गणेश्वरगुहावपि वागधीशम् ।
सिद्धान्तपञ्चककृतोऽर्कमुखान् ग्रहां च
त्रेधा नमामि वचसाममलत्वसिद्ध्यै ॥
पूर्वैः कृतानि विविधानि मुहूर्तशास्त्रा
ण्यालोच्य सज्जनसमाचरितांश्च मार्गान् ।
इत्थं गुरोः करुणया वरदीपिकायाम्
कुर्वेमुहूर्तपदवी विवृतिं स्फुटार्थाम् ॥
इह खलु महावास्तुपुरसम्भवो—

End :

अक्षरं यत्परिभ्रष्टं मात्राहीनं तु यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥

Colophon :

— — —

319

Sl. No: 32126 | **मुहूर्तमार्ताण्डः** | **Ms. No: P. 5368/1**

Beginning :

मातार्ण्डोऽवतु वाचं नः पादैजाड्यतमोहरः ।
वृत्तबुद्धतनुसेव्योऽभीष्टदेवो विश्वलोचनः ॥
सिन्धूरोल्लसितमिभेन्द्रवक्त्रमम्बां
श्रीविष्णुं वियतिचरान् गुरून् प्रणम्य ।
बह्वर्थं विबुधमुदे लघुं मुहूर्त-
मार्ताण्डं सुगममहं तनोमि सिध्यै ।

End :

यत् षष्ठ्यां युत शतवृत्तबन्धमेनं
मर्ताण्डं पठति नरस्स विश्वपूज्यः ।
बह्वायुः सुखधनपुत्रभृत्यान्
सम्प्राप्नोत्यविकलधीश्च तीर्थसिद्धिम् ॥

Colophon :

श्री नन्ताख्यचातुर्मास्ययाजिपुत्रनारयणभट्टविरचितः मुहूर्तमार्ताण्डस्स-
माप्तः ॥

320

Sl· No : 32137 | **मुहूर्तमार्ताण्डटीका** | **Ms. No: C. 2258/2**

Beginning :

श्रीलम्बोदरशारदागुरुपद श्रीशैलनाथं शिव
मादित्यादिनवग्रहान् सफलदान् दैवज्ञनारयणः ।
नत्वा बालकबोधिनीं प्रकुरुते मौहूर्तमार्ताण्डस-
द्व्याख्यां मञ्जुलभाषिणी हितकरीं कर्नाटकानां मुदे ॥
सिन्धूर– ಚಂದ್ರನಿಂದ, उल्लसितं– ಶೋಭಾಯಮಾನವಾಗಲ್ಪಟ್ಟಂಥಾ

End :

अलं– ಅತಿಶಯದಿಂದ, उद्धतः सन्– ಉತ್ಕೃಷ್ಟವಾದಂಥಾದದ್ದಾಗಿ,
जयतु– ಸರ್ವೋತ್ಕೃಷ್ಟದ್ದಾಗಿ ಇರಲಿ.

यः सौरतन्त्रगणितार्णवपारदृश्वा
नित्याहिताग्निरतिथिप्रियसत्प्रतीक्ष्यः ।
नारयणेन विहितोऽत्रपरिश्रमो यः
प्रीतोऽस्तु तेन सुकृती गुरुकाशिवीर्यः ॥

Colophon :

इति श्रीमुहूर्तमार्ताण्डवल्लभायां शिशुसुखाववोधिन्यां सङ्कान्तिप्रकरणं समाप्तम् ॥

321

Sl. No: 32139 मुहूर्तमार्ताण्डटीक Ms. No: P. 5368/2

Beginning :

मार्ताण्ड इत्यादि —

अर्थद्वयवाचि–तत प्रथमं सूर्यपक्षे मार्ताण्डः सूर्यः नः अस्माकं वाचं अवतु रक्षतु । किंलक्षणो मार्ताण्डः । वृत्तबद्धतनुवृत्तिमण्डले बद्धतनुर्येन स तथोक्तः ।

\+ + + +

प्रणम्य नमस्कृत्य अनन्तरं नारायणो मुहूर्तमार्ताण्डंनाम ग्रन्थं तनोमि विस्तारयामि ।

End :

षष्ठ्यायुतं शतं तस्मिन् शतवृत्तानि तैर्बद्धो यस्य सः । ×
तमेनं मार्ताण्डं यो नरः पठति न विश्वपूज्यो भवति । केवलं विश्वपूज्यः अपि तु बह्वायुस्सम्प्राप्नोति मुहूर्तदानान् साधितकालस्य विश्वपूज्यो भवतीत्युक्तम् ।

Colophon :

इति श्रीमदनन्ताख्या चातुमास्यायाची पुत्रे नारयण विरचित मुहूर्तमार्तण्ड-टिकायां मार्ताण्डवल्लभायां मुहूर्तमार्ताण्डस्समासः ॥

322

Sl. No: 32145 **मुहूर्तरत्नाकरः** Ms. No: C. 4698/28

Beginning :

सोऽयं गजास्योऽवतु मामजस्रम् यत्फालदेशोधसुधांशुरेखाः ।
सुधाब्धिपूरं प्रकटीचकार दानाम्बुधारोद्गिरिणाच्छलेन ॥

End :

कुयुकुसंज्ञे करणे कुदेशे
परस्य गेहे पथि नैव शस्तम् ।
सन्ध्यापराह्णे निशि वा न शस्तं
रजः सृपोपप्लवपापलग्ने ॥
पीतं सितं नूतनदा वस्त्रम् ॥

Colophon :

इति श्री भोंजराजविरचितायां स्वनिर्मिते मुहूर्तरत्नाकरटीकायां नैकाभिधायां नक्षत्रप्रकरणं तृतीयोऽध्यायः ॥

323

Sl. No : 32146 **मुहूर्तरत्नाकरः** Ms. No : C. 4700/41

Beginning :

× त्रार्तवास्यो भवतीह दोषः ।
हरित्रयेऽर्कत्रितयेऽन्त्ययुग्मे
शाक्तेन्दुभे वाहिनि भिद्वये च ।
यूढारहक्षौरनखोक्तकर्म
कार्यं विहायार्किकुजार्कवारान् ॥
व्वर्णैरिनारार्कयमेषु कार्यं
सर्वे सितज्ञे दि × सितेन्दौ ॥

End :

ज्ञेया गलग्रहा कादि-
× माद्वित्यां तिथिद्वयम् ।
मौञ्जीबन्धे च विद्यायांष्ठी वि + + सुतव्रते ॥
आसीदग्रजराजवन्दितपदः श्रीवामनो विश्रतो

त्रयोदश्यादि च (य) × रः
चतुर्थी शुक्लकृष्णयोः ।
षष्ठी च द्वादशी कृष्णा
अष्टावेते गलग्रहाः ॥

Colophon:

इति श्री भोजविरचितायां स्वनिर्मितमुहूर्तरत्नाकरटीकायां नैकाभिधायां अनध्यायप्रकरणं नाम पञ्चदशोऽध्यायः ।

324

Sl. No : 32148 मुहूर्तरत्नाकरटीकाः Ms. No: C. 4688/10

Beginning :

व्रतबन्धप्रकरणम् ––

व्रतं द्विजादे र्जननाच गर्भादष्ट सूर्याख्य औत्सुकायंम । प्रज्ञाकलाप्राप्ति विशेषकामात्पञ्चाङ्गनागोन्मित ह्यने सती । अथ गौणकालमाह ।

End:

इति दैवज्ञवल्लभे–अस्यार्थः सितेकरे कृष्णपक्षे चन्द्रोदय चन्द्रयुक्तलग्ने सति अभिषिक्तः कृतोपनयनं क्षयरोगो सा × चन्द्रस्येक्षण × सिते पक्षे भवेद्य-जेत्यादि स्पष्टं ।

Colophon :

इति श्री भोजाजदैवज्ञ परिचितायां स्वनिर्मित मुहूर्तरत्नाकरटीकायां नौकाभिदायां व्रतबन्धप्रकरणम् ॥

325

Sl. No. 32149 मुहूर्तरत्नाकरव्याख्य Ms. No: C. 4698/20

Beginning :

अथेदांनीं आप्रकरणोंक्तदोषलक्षणान्विवक्षुः तत्रादौ यामार्धकुलि-कानाह–

अथेदानीं यं × युलैकार्गलश्लोकैकेनाह
अथ दुर्मुहूर्तानाह × अथ प्रकारान्तरेणाह ॥

End :

अथ अधोमुखनक्षत्राण्याह । दिनरात्रिमुहूर्तानाह ॥
सामान्याकारेण लग्न . . . माह अन्तु अध्याय ३के श्लोक ३१ के मङ्गलमहा श्री श्री ॥
अथ प्रथमार्तवप्रकरणं चतुर्भिः श्लोकैराह ॥

Colophon :

इति श्री भोजराजविरचितायां स्वनिर्मिते मुहूर्तरत्नाकरटीकायां नैकाभिनक्षत्रप्रकरणं तृतीयोऽध्यायः ॥

326

Sl. No :32153 **मुहूर्तविधानम्** **Ms. No: P. 4480/20**

Beginning :

अथातः सम्प्रवक्ष्यामि लघुहोरा + थाविधिः ।
अहोत्रेषु नाडीषु प्रत्येकं नामसंज्ञिकम् ॥
तत्र कर्मविधिः प्रोक्तास्तत्काले लक्षणं तथा ।
दिशि भागे क्रिया संज्ञा ष × नाडी यथाक्रमम् ॥

End :

एतैः संक्षेपतः प्रोक्ताः नाड्यस्तत्काललक्षणम् ।
युक्त्या तदनुसारेण व्यूहनीयतया बुधः ॥
मेषादिराशिसंज्ञानां नाडीलक्षणमुच्यते ।
तत्कालप्रोक्तनाडीभिः कार्य कारेते बुधः ॥ (?)

Colophon :

इति बार्हस्पत्ये मुहूर्तविधाने लघुहोरा नाम विंशोऽध्यायः ॥

327

Sl. No : 32154 **मुहूर्तविधानम्** **Ms. No: P. 9177**

Beginning

जन्मर्क्षादिसमुद्रगुण्यसंख्यावारैर्दिनसंयुक्तंतम्
गोभक्तोरविसौ राहुमुरु केतुश्च शेषक्रमात ।
चन्द्रो मन्दरविभूमितनयातापं लाभं क्षुधं
धैर्यं शोकशशसर्पनिविभवो मृत्युश्च नित्यग्रहाः ॥ (?)

End :

भरणी बृहतीनां तु मेषलग्ने निवापनम् ।
आदित्यं हृदयं श्रेष्ठमिक्षूर्णं तु निवापने ॥
स्वाती च सर्वसस्यानां श्रेष्ठाचन्द्रोदयेनघ ।
त्वाष्ट्रमुद्गमसंज्ञानां जीवलग्ने शुभावहम् ॥

Colophon :

इति बार्हस्पत्ये मुहूर्तविधाने विवाहविधिनामाष्टमोऽध्यायः ॥

328

Sl. No 32170 **मेघमाला** **Ms. No : P. 1815**

Beginning :

नित्यं तावदमी नराधिपतयः पाल्याः प्रजाः पुत्रवत्
तावन्नीतिविदः स्वधर्मनिरताः तावन्मुनीनां तपः ।
तन्मित्रं च कलत्रपुत्रपितरः स्नेहेन तिष्ठन्त्यहो
यावत् त्वं प्रतिवत्सरे जलधरे क्षोणीतले वर्षति ॥

End :

यदि तत्रामलश्चन्द्रः परिवेषयुतोऽपि च ।
तदा जलं स × × शक्रेणापि न दृश्यते ॥
शुचौ कृष्णचतुर्थ्यां च उत्पद्याच्छादितो रविः ।
त्रिपक्षं यदि संयुक्तं तदा वर्षति माधवः ।
शुचौ कृष्णचतुर्दश्यां तुषारानविपातयेत् ॥

इति श्रीं रौद्रीमेघमालायां गगेशक्रसंवादे सङ्क्रान्तिभेदकेतोदय समाप्तम् ॥
इति श्री रोद्रीमेघमालायां समाप्तः ॥

329

Sl. No : 32171 मेघमालमञ्जरी Ms No: P. 8011

Beginnig

कैलासशिखरे रम्ये प्रणम्य परमेश्वरम् ॥
पप्रच्छश्री महादेवी पार्वतीपरमेश्वरी ॥
केनोपायेन भगवान् जीवेयुः सकलाः प्रजाः ।
तन्मे संक्षिप्य सर्वेश ब्रह्मोपायमनुत्तमम्

End :

कृत्तिकादित्रयोवृक्षं आर्द्रादष्ठंचभि × ह ।
पूर्वाषाढचतुष्कंच उत्तरारवनीतथा ॥
एतेषु चन्द्रवक्षाणि अन्यत्नरविधीयते ।
सूर्य सूर्य महावायुः चन्द्र चन्द्य न वर्षति ॥
सूर्यचन्द्रसमायोगः महावृष्टिर्भविष्यति ॥

Colophon :

इति मेघमालामज्यां जीमूतलक्षणां समाप्तम ।

330

SI. No: 32176 यन्चिन्तामणिः Ms. No: P. 4440/3

Beginning :

नत्वा भवानीं प्रमथधिनाथं
रवीं गुरोरङ्घ्रियरविन्दयुग्मम् ।
यन्त्रं प्रवक्ष्ये गणितानपेक्षं
यथा सुबोधः × भयादि × नाम् ॥

End :

ज्योतिश्शास्त्रमहार्णवामृतकरः सत्सूक्तिरत्नाकरः ।
तत्सूनुः क्षितिपालमौलिविलसद्रत्नं ग्रहज्ञाग्रणीः
चक्रे चक्रधरः कृती सविवृतिं सद्यन्त्रचिन्तामणिम् ॥

Colophon :

यन्त्रचिन्तामणौ प्रकीर्णकाध्यायः चतुर्थः ॥

331

Sl. No : 32177 **यन्त्रचिन्तामणिव्याख्या** **Ms. No : A. 4440/4**

Beginning :

नत्वा गणपतिं रामो मधुसूदननन्दनः ।
यन्त्रचिन्तामणेष्टीकां कुर्वेऽहं सोपपत्तिकम् ॥

तस्य च यन्त्रसाध्यत्वाद्यन्त्रचिन्तामणिनामकं ग्रन्थं विवक्षुश्चक्रधरो नामाचार्यः पूर्वार्धेनेष्टदेवतानमस्काररूपं मङ्गलमांचरन्नपरार्धेन स्वचिकीर्षित × छन्दसा व्यञ्जयन्नाह नत्वेति— + + +

End :

आचार्येण केवलश्लोकरूपा टीका कृतास्तीति स × मित्युक्तम् ।
पदव्याख्यानरूपैव टीका ग्रन्थकृता कृता ।
अतो मया विदां प्रीत्यै कृतेयं सोपपत्तिका ।

Colophon :

इति श्रीदैवज्ञमधुसूदनात्मजरामदैवज्ञविरचितायां यन्त्रचिन्तामणिटीकायां यन्त्रदीपिकायां प्रकीर्णाध्यायश्चतुर्थः ॥

332

Sl. No : 32181 **यवनहोरा** **Ms. No : P. 1403/1**

Beginnig :

तत्र तिथिफलम् —

कृत्वाग्निहोत्रेमासिनं यवनं मुनिपुङ्गवम् ।
विनयेनोपसङ्गम्य काश्यपः परिपृच्छति ॥

पवनः —

साधु साधु महातेजाः गुणवान् परिपृच्छसि ।
तत्सर्वं कथयिष्यामि पञ्चाङ्गफलजातकम् ।

End :

अपूपप्रियः । राज्यपूज्यः । शिरोव्रणाङ्कितः । दक्षपार्श्वेति । तिलमध्याङ्कितः । जलाग्नि + आयधु चतुष्पादभयम् । अप्सु भयम् । आवुभयम् । नवशशिवर्षे परमायुः ॥

Colophon :

अंशफलं सम्पूर्णम् ॥

333

Sl. No :32185 — यवनजातकम् — Ms. No: C. 4697/11

Beginning :

तनुभावविचारः —

लग्नाद्द्वादशभावेषु यदाद्भावयाः ।
लग्नकेन्द्र त्रिकोणे वा भवन्ति ।
तस्य स्थानकलमुत्तमम् ।

End :

ग्रहे स्वक्षेत्रे वा स्वोच्चे वा स्वद्रेक्काणे वा स्थितराशौ वा लांछनं चरराशौ चरद्रेक्काणे चरनवांशे वा उभयद्रेक्काणनवांशे वा जननात्परं सम्भवतीति वक्तव्यम् ॥

Colophon :

— — —

334

Sl. No : 32186 — यात्राकल्पलता — Ms. No: P. 8859/8

Beginning .

वन्दे तान् शारदोष्णांशुसत्यानन्दसदाशिवान् ।
यदङ्घ्रिसेवयालोके जडात्माऽपि कलानिधिः ॥
वल्लालान्वयपापतिम्मयसुतः . . मखी ॥

तदंघ्रिसेवया लब्धबोधस्सुब्बयदैववित् ।
तनोति विबुधप्रीत्यै यात्राकल्पलतामिमाम् ॥

End:

उदयेऽस्तमये चापि विषनाडी भवेद्यदि ।
क्रमात्तत्र दिवारात्रौ शुभकर्माणि वर्जयेत् ॥

Colophon :

इति विषप्रकरणम् ॥

335

Sl. No : 32191 **यात्राप्रकरणम्** **Ms. No : P. 742/55**

Beginning :

यात्राविधानं कथयाम्यथाहं
सर्वैरुपेतस्य गुणैर्जिगीषोः ।
अतर्किते जन्मनि तस्य याने
फलासिरुक्ता गुणवर्णतुल्या ॥

End :

मार्जारयुद्धकलहः कुटुम्बी
रजस्वलास्त्री निजगेहदाहः ।
पशुद्रुतं पन्नगदर्शनं
यात्रामुखाः प्राणहताः षडेते ॥
तक्रं तैलाभिषिक्तं (इत्यानेव ग्रन्थः)

Colophon :

— — —

336

Sl. No. 32235 **यानारोहणविधि** **Ms. No: P. 4180/95**

Beginning :

अथ यानारोहणविधिः —

अथ यानारोहणविधिं व्याख्यास्यामः उदगयन आपूर्यमाणपक्षे पुण्यनक्षत्रे आत्मन्यनुकूले ज्योतिश्शास्त्रविदुक्तमते ।

सुलग्ने पुण्याहं वाचयित्वा तत्र पूर्वदिग्भागे उल्लेखनप्रभृतिप्रणीताच्छादनान्तं कृत्वा पात्रयाग्रेणाग्निदेवतामावाहयेत् ॥

End :

मातापित्रादिगुरुजनैर्वादितेष्टदेवता स्मरणपूर्वकं यानमारोहयेदिति आजगाम स्थिरायुस्थिरैश्वर्यो भवतीत्याह भगवान् बोधायनः ।

Colophon :

इति यानारोहणविधिः ।

337

Sl. No: 32238 **युगवत्सरसंख्यानिर्णयः** Ms. No: A. 477/5

Beginning :

कृताब्दाः खत्रयं भोगिविवत्कन्दसंख्यकाः ।
हरिश्चन्द्रो नलश्चैव पुरुकुत्सः पुरूरवाः ।
सगरः कार्तवीर्याख्यः कृतोऽमी शकभूभुजः ।
आदौ हरिश्चन्द्रसमाः खत्रयाहिमदाश्विनः ॥

End :

युगे युगे षडाख्याताः सर्वज्ञाः चक्रवर्तिनः ।
चतुर्युगानां शरदः खाभ्राभ्राभ्ररदाब्धयः ॥
श्रीचामण्डाकृपापूर्ण कृष्णराजेन्द्रशेखरः ।
कथयामास सयुग शकभूपालवत्सरान् ॥

Colophon :

चतुर्युगगळ आया भूपालकरुगळे अळिके शकवर्षगळ संख्या विवरणं संपूर्णम् ॥

338

Sl. No : 32246 **योगचिन्तामणि** Ms. No : C. 876

Beginning :

× जीवकर्यरचोरुैव लवङ्गं बंसरोचनम् ।
पुण्डरीकं च कंकोली पत्रकं जातिपत्रकम् ॥
तालीसं पत्रकं चैव समभागा विचूर्णरान् ।
सर्वचूर्ण चतुर्थांशं किरातं प्रक्षिपेत् सुधीः ॥

End :

नागपुरीयतयोगण राजहर्षकीर्ति सङ्कलिते ।
वैद्यसारोद्धारे सप्तमाङ्को मिश्रकाध्यायः ॥
जाप्या योगप्रदीपोस्ति पूर्वयोगसतं तथा ।
तथैवायं विजयतां योगचिन्तामणिश्चिरम् ॥

Colophon :

इति श्रीमन्नागपुरीय तपागच्छाय श्रीहर्षकीर्तिसूरिसङ्कलिते श्रीयोग-चिन्तमणौ मिश्रकाध्यायः समाप्तः ॥

339

Sl. No : 32280 **योगासारावली** **Ms. No: P. 4480/3**

Beginning :

केन्द्रे विलग्नगे श्रेष्ठे वले मानादिसंयते ।
लग्नेशे केन्द्रभावस्थे गुरुणा च निरीक्षिते ॥
मानुषो शुभगो जातः दिव्यलक्षणसंयुतः ॥

End:

× × × मन्दाहिसंयुक्ते भौमजीवनिरीक्षिते ।
अधर्ममूलार्थे नाशनं बहुद्रव्यक्षयो भवेत् ॥
लग्नेशे व्ययराशिस्थे व्ययेशे लग्नसंयुते ।
भृगुमन्त्रेण सन्दृष्टे धर्ममूला धन × ॥

Colophon :

एवं द्वादशभावः समाप्तः ॥

340

Sl. No: 32284 **योगाध्यायः** **Ms. No : P 7415/3**

Beginning :

सुखाधिपस्य केन्द्रस्य तत्स्थाने गुरुसंयुते ।
अश्ववाहनपूज्यश्च राजतुल्यधनावहः ॥
जन्मकाले धनाढ्यश्च चिरञ्जिवी प्रतापवान् ।
निधिज्ञः कर्ममिश्चैव सर्वदा सुखमाप्नुयात् ॥

End :

नीचं गतो वा यदि सूर्यपुत्रः
तदीश्वरः सोच्चगतोऽपि तस्य ।
तदीश्वरो वा यदि केन्द्रवर्ती ।
राजा भवेद् भूपतिचक्रवर्ती ॥
तस्यायुषोऽन्तं लुलुभं गतोऽसौ ।
स्त्रीणां यशः परशरेण तप्तः ॥

Colophon :

इति योगार्धायः (योगाध्यायः) ॥

341

Sl. No: 32288 **योगार्णवः** Ms. No: P. 4673/1

Beginning :

नत्वा तं मनसा × मण्डव × × नं श्रीवेङ्कटेशः स मां श्रीमानप्पय भूसुरात्मजवरोहोविदां प्रीतये । ज्योतिश्शास्त्रमहार्णवप्रतरणे (?) सङ्गृह्य शास्त्रां तथां वक्ष्ये जातकशास्त्रमार्गफलदं योवार्णवाख्यं प्लु × : ॥

ऊहापोहविशारदः परपत श्रीतु × ड्य + द्ध × काश्यपवंशजो गुरुकृपालब्धप्रसादा भुवि । त्रि × यार्थ × दां विनायकपु × र × प्रशि × जं × न × थ × द– रविध्द × र × स्कन्धत्रयमर्मभि × द्वितीये × दशे ×

End:

कदाचि × सौख्यमाप्नोति मर्त्योः कदाचित् न्दुःख भूते × नरस्यात मिश्रे मिश्रे योगे चन्द्रवद्वृद्धिनाशौ सर्वे × यं शास्त्रकारोक्तमार्गैः ॥

Colophon :

इति योगार्णवे सप्तमोऽध्यायः । योगार्णवः समाप्तः ॥

342

Sl. No: 32293 योगार्णवः Ms. No: P. 7390/12

Beginning :

देवदेव जगन्नाथ शूलपाणे वृषध्वज ।
केन योगेन मर्त्यानां शापात्सन्ततिनाशनम् ॥
तत्सत्यं ग्रहयोगेन ब्रूहि मे शशिशेखर ॥
शापमोक्षं च कृपया प्राणिनाम × मेघसा ॥

End :

लग्नेषु ते (त्रे) शशाङ्कास्ते कारके नीचराशिगे ।
अपुत्रसेनाशराशिस्थे अन्यपत्यत्वमादिशेत् ॥
क्रूरदृष्टीं शिगे जीवे पुत्रस्थे नाशरासिगे ।
अपुत्रसेनाशराशिस्थे अन्यपत्यत्वमादिशेत् ॥
कूरदृष्टींशिगे जीवे पुत्रस्थे नाशरासिगे ।
पुत्रे सेनाशारासिस्थे अन्यपुत्रत्वमादिशेत् ॥ (?)

Colophon :

— — —

343

Sl. No 32297 योगावलिः Ms. No. C. 6414/2

Beginning :

उमासुतं नमस्कृत्य अम्बिकां हंसवाहिनीम् ।
योगानन्दगुरुं वन्दे परमानन्दरूपिणम् ॥
उमापतिं जगद्वन्द्यं सर्वेशं शशिशेखरम् ।
नीलकण्ठं महादेवं शङ्करं प्रणमाम्यहम् ॥
+ करोति योगावलिमादरेण ॥

End :

× रलग्नाधिपो चन्द्रे अन्त्यांशे अन्त्यराशिगे ।
षष्ठेश्वरेणसंदृष्टे सहचर्या भवेद्ध्रुवम् ॥
योगे सवर्णके जाता सा नारि सुरपूजिता ।
सत्यशील महाश्रेष्ठा पातिव्रत्यशिरोमणिः ॥

Colophon :

इति त्रिंशद्योगावल्यां नीलकण्ठात्मजनृसिंहेन विरचितायां योगावली जातकग्रन्थः समाप्तः ॥

344

Sl. No: 32304 | **योगिनीजातकम्** | **Ms. No: P 4480/45**

Beginning :

अयोगिनी देशे —

अश्विन्यादिषु नक्षत्रे × गण्यते ।
त्रीणि योज्यं वसुभक्तं तच्छेषं फलमुच्यते ॥
चन्द्रे रविबुधे भौमे गुरुमन्दस्तथैव च । (?)
भृगुराहुस्वपि जयं क्रमादष्टगृहं फलम् ॥

End :

दशासंख्या क्रम × वर्षमेकन्तु पिङ्गलायां द्विवर्षकम् ।
त्रिवर्षं धन्यकश्चैव भ्रामरीच चतुष्टकम् ॥
भद्रिका पञ्चवर्षाणि उल्काषष्ठः तथैव च ।
सिंहन्तु सप्त वर्षाणि स × राचाष्टवर्षयोः ॥

Colophon :

इति योगिनीजातकदशांफलं संपूर्णम् ॥

345

Sl. No: 32307 | **योगिनीदशा** | **Ms. No: P. 7514/8**

Beginning :

जननीजन्मसौख्यानामिति ॥
विधातृलिखितायां तु ललटाक्षरपङ्क्तिका ।
दैवज्ञैः कथ्यते सम्यग्घोरा निर्मलचक्षुषा ॥
आ × च द्वितीयं चन्द्रपूर्वकम् ।
षष्टीमिर्हस्ते भागं शेषं च फलमादिशेत् ॥

End :

सङ्कटामध्ये सिद्धान्तरदशामासाः १८ दिन २०क्के फलम्
सर्वार्थसिद्धिं सुरदेवभक्तिं
सुतादिसौख्यं धनधान्यलाभम् ।
सुवस्त्रपानादिसुखं करोति
या सङ्कटायान्तरगे च सिद्धा ॥

Colophon :

ईश्वरप्रोक्त योगिनीदशा सम्पूर्णा ॥

346

Sl. No : 32329 रत्नदीपः **Ms. No: C. 885**

Beginning

प्रणम्य शारदां देवीं गणेशं शशिनन्दनम् ।
ब्रह्मविष्णुमहेशादीन् वक्ष्येऽहं जन्मजं फलम् ॥
न योगं द्रुमयोगं च सुखयोगं तथैव च ।
दारिद्र्यस्यमहायोगं योगंवैरोगजं तथा ॥
चौरयोगं पापयोगं जातिभ्रंशनमेव च ॥

End :

द्रेक्काणनाथो रिपुरंधुमार्गे
गुरुः × सन्विडचतुर्थगच्छः ।
लग्ने × नांशोदयगे तु मोक्षः
नरस्य वारुङ्गतस्त × नी ॥
श्रीगोपालगुरुं नत्वा रत्नदीपाख्यजातकम् ॥
चक्रे गणपतिश्चैव सुगमं गणकप्रियम् ॥

Colophon :

इति श्रीरत्नदीपके गणपतिकृते निर्वाणयोगः ॥ समाप्तोयं ग्रन्थः ॥

347

Sl. No. 32330 **रत्नपञ्चिका** **Ms. No: P. 7390/9**

Beginning :

आदौस्वर बलं वक्ष्ये चक्रनामान्यतः परम् ।
भूबलानि बलान्यत्र ज्योतिषां गन्तुशाकुतम् ॥
अभिधानान्यत संज्ञा सर्वचक्राणि षोडश ॥
राहुकालानलाभूमिः स्वरभूमिद्विर्धा मता । (?)

End:

रूद्रस्त्रींमाशिका चैव राहु चाष्टविधा मता ॥ (?)
चन्द्रःसप्तविधस्सूर्यः चतुर्धा योगिनो त्रिधा ।
कालं बलं त्रिभेदं च तिथिनक्षत्रपार × ॥

Colophon:

— — —

348

Sl. No : 32333 **रमलुचिन्तामणिः** **Ms. No : P. 833**

Beginning :

गजास्यं सिन्धूरा × णितवदनं विघ्नदहनं,
स्वकार्यं बृन्दारैः नमितचरणं शीर्षकमलैः ।
तथा देवीं वन्दे सुजन × × दात्रीं त्रिभुवने,
ग्रुदीपं चक्रस्थं सकलदुरितौघ × × लम ॥
यः प्रश्नशास्त्र निष्णातः रम्यशास्त्रप्रवर्तकः ।
या × नं शास्त्रं लमलं प्रश्नसंत्तहम् ॥

End :

द्विजनैरिसमुत्पन्नशास्त्रं द्विजवरैः पठेत् ।
(स)पङ्केरुहं यथा ग्राह्यं दुष्टसर्पफणीमणिम् ।
यथा नीचान्महाविद्या गृह्यते सुमहात्मभिः ।
बुद्धिमान् सर्वभूतेषु हींनोत्र × न गृत्यते ॥

Colophon :

इति श्रीरमुल शास्त्रे चिन्तामणिविरचिते प्रश्नतन्त्रे षोडशकलशप्रश्नतन्त्रं सम्पूर्णम् ॥

349

Sl. No : 32342 रमलेन्दुप्रकाशः Ms. No : C. 4566

Beginning :

जेयाजेयान् जयति दितिजान्यत्प्रसादेन विष्णुः
जिष्णुर्लोकानवति सकलान् यत्पदार्चात् प्रसादात् ।
स्वष्टा स्रष्टा हरति च हरेः प्रान्तकाले च सां वा
विघ्नेशांवा हरतु दुरितं मे सुसिद्धिं विधत्ताम् ॥
ज्योतिर्विदां सुबोधाय रमलाम्बोधिसारतः ।
रमलेन्दुप्रकाशोऽयं शिकलैस्तेन तन्यते ॥

End :

रामचरित्रं रचितं रचितोऽयं तत्त्वसंज्ञकैरद्धैः ॥
पुत्रवतीयुवनी विशदाभूद्येन सती भवति ॥
हवसन्ति तेन विद्याय समर्पित ईशायाः पद्योरयमाचिरमास्ताम् ॥
यथा हिमांशुभूपाल कलमालाभ्यलंकृतः ।
रमलेन्दुप्रकाशोऽयं यथा शक्त्याऽभ्यलंकृतः ॥

Colophon :

इति रमलेन्दुप्रकाशः सम्पूर्णः ॥
इति श्री रुद्रमणित्रिया विकल्पितो रमलेन्दुप्रकाशः समाप्तः ॥

350

Sl. No: 32360 राजमार्ताण्डः Ms. No: C. 8684/19

Beginning :

यच्छास्त्रं सवितावतारविपुलं स्कन्धे त्रिभिर्ज्योतिष-
स्तास्याछित्तिमयात्पुनः कलियुगे संस्मृत्य यो भूतलम् ।

भूयस्वल्पतरं वराहमिहिरयाजेन सर्वं व्यधात
इत्थं यं प्रवदन्ति योगकुशलास्तस्मै नमों भास्वते ॥
पूर्वाचार्यामनस्यास्य यच्छिष्टं लघु स्फुटं बीजम् ।
तद्बुद्धिदं श्रुतफरं रहस्यमत्यद्भुतं वक्तुम् ॥
खटःपुरोहितो मन्त्र देव . . र्थकः ।
प्रातःकालेषु इष्टव्या नित्यं स्वश्रियामिच्छता ॥

End :

पारावतः सत्वकवीश्वराणां
स्वार्थाय पथ्यै गणितप्रवन्धः ।
अस्माकमेतत्किल केवलाय
परोपकाराय विधानमत्र ॥

Colophon :

— — —

351

Sl. No 32397 **राशिकूटतन्त्रम्** **Ms. No : P. 7064**

Beginning :

वन्दे देवीं गुरुं खेटान् गणनाथं महेश्वरम् ।
मातापितृन् नमस्कृत्य लिख्यते राशिकूटकम् ॥
दिनं गणं च माहेन्द्रं स्त्रीदीर्घं योनिमेव च ।
राशि राश्याधिपो वश्यः रज्जुर्वेधास्तथा दशाः ॥

End :

राशिकूटाख्यतन्त्रोऽयं सैकादशशतद्वयैः ।
पद्यवर्यैः कृतस्सम्यक् सर्वशास्त्रानुगुण्यतः ॥

Colophon :

दशसंख्याकैः पत्रैः कूटरत्नाख्यग्रन्थः सम्पूर्णः ।

352

Sl. No : 32484 **रोमशसिद्धान्तः** Ms. No: B. 609/3

Beginning :

कालस्य कर्ता कमलस्य भर्ता
लोकस्य धर्ता तिमिरस्य हर्ता ।
विकर्तनः सत्पथवर्तनोऽयं
स्फूर्तिं गिरां कीर्तिसखं प्रयास्युः ॥
वसिष्ठो रोमशमुनिं कालज्ञानाय तत्त्वतः
उपवासं ब्रह्मचर्यं प्रागेकं विष्णुतत्परः ॥

End :

विस्तारोऽर्थाचलगजाः इह म स पूर्ववत । (?)
नवगोतिथिविस्तारः चत्वारोऽत्र पृथक् पृथक् ॥
सितान्ताद्यस्तेषु हंसे सहस्रब्रह्मपूजितः ।
सप्तर्षीणां पुरव्यासः वियद्बाणाद्रियोजनम् ॥

Colophon :

इति रोमशासिद्धान्ते अष्टमोऽध्यायः ॥

353

Sl. No: 32485 **लम्पाकः** Ms. No: P. 5892/2

Beginning :

अध्यासीनं महादेवं महापद्मं द्विपड्दलम् ।
विघ्नराजं च सम्पूज्य वक्ष्ये लम्पाकमापरात् ।
नमस्ते शूलहस्ताय चन्द्रार्धकृतशेखर ।
त्वत्प्रसादात् प्रवक्ष्यामि लम्पाकं लोकभूषणम् ॥

End :

आरूढभक्तिदृष्टीनां ग्रहजात्या स्वहितम् ॥
नामाक्षरमिदं प्रोक्तं लम्पाकं ज्ञानदं स्फुटम् ।
ज्ये × त्ववर्ग्रकादीनां अक्षराणां यथाक्रमम् ।
विसर्गलिपिबिन्दुश्च जप्ये × नामिदम् ॥

Colophon :

इति श्री लम्पाक × शास्त्रे प्रकीर्ण काण्डः चतुर्थः ॥
ग्रन्थः समाप्तः ॥

354

Sl. No : 32488 **लम्पाकज्योतिषम्** **Ms. No : P. 4860/4**

Beginning :

सर्वेषां लोकनाथाय सर्वप्राणिहिताय च ।
सर्वभूमिनिवासाय सर्वेशाय नमो नमः ॥
अभावं चैव शास्त्राणि दृष्ट्वा शास्त्राणि च्योतिषम् ।
तं दृष्ट्वा चैंव लम्पाकं इत्येवं मुनिरब्रवीत् ॥

End :

अहं च जगादाराद्यं वन्दे लोकद्रहाधिपम् ।
विरिञ्चिशम्भुरूपाय ब्रह्मरूपाय महात्मने ॥
त्रिलोकजगदारध्य चन्द्रै लोकग्रहाधिपम् ।
रत्नाधिप क नाम्ना वै कृतिकारो वलोत्तमः ॥

Colophon :

ईति महाऋषिविरचिते ज्योतिषशास्त्रे प्रश्नविषये लम्पाकं नाम समाप्तः ॥

355

Sl. No : 32498 **लम्पाकव्याख्या** **Ms. No : P. 6558/2**

Beginning :

ब्रह्मविष्णुमहेशानां कारणं जगतोऽस्य च ।
वन्दे परात्परं ब्रह्म प्रमाणातीतगोचरम् ॥
बोधाद्वैतमयं नित्यं शक्तितोऽभिन्नयींश्वरम् ।
प्रणम्य क्रियते श्रीमल्लम्पाकनिवृतिः परा ॥
प्रारीप्तिस्य पद्मनाभाख्यो ग्रन्थकारः अध्यसीनमिति ॥

End :

नष्टमुख्यग्रहसंख्यया युक्तद्रव्यस्य
ज्ञानोपायमाह आरूढपादादिति ॥

आरूढपादस्य अनन्तरराशिस्थं भपादचतुष्टयाधिपतिना धात्वादि नष्टद्रव्यं समीमस्थद्रव्यमिति वदेत् ॥

शास्त्रप्रतिज्ञातग्रन्थसंख्यां निरूपयति पद्मनाभेति ॥

Colophon :

लम्पाकव्याख्यानं सम्पूर्णम् ॥

356

Sl. No: 32503 **लक्ष्मीनारयणसंहिता** **Ms. No: P. 6517/1**

Beginning :

नारायणं परमपूरुषमादिदेवं
ज्योतिर्मयं शुभकरं च चराचराणाम् ।
शान्तं प्रणम्य शिरसा द्विजपुङ्गवानां
प्रश्नार्णवप्लवमिदं प्रकरोमि शास्त्रम् ॥
श्रीब्रह्मदास . . . समीक्ष्य
नारयणः परमशास्त्रमिदं जगाद ॥

End:

जयति जगति विष्णोः भक्तधुर्यः क्रियावान् —
प्रशमित . . . नारायणस्य ॥
श्रीसिद्धनारायणदासग्रन्थं
ये वैद्यकं वाऽप्यथ ज्यौतिषं वा ।
विलोकयिष्यन्ति नृपाङ्गयोगे
पूज्या भविष्यन्ति हरिर्जगाद ॥
हरिजीवदत्तमाशीवदिषट्कमिदं सिद्धयेऽस्तु ॥

Colophon :

इति श्री ब्रह्मदासपुत्र श्रीनारयणदाससिद्धविरचिते वैष्णवशास्त्रे पञ्च दशोऽध्यायः ॥

357

Sl. No. 32504 **लक्ष्मीनृसिंगणितम्** **Ms. No: P. 2568/3**

Beginning:

श्रीमक्ष्मीनृसिंहांघ्रि पद्मयुग्ये × ×
वेल्ललायल्लायाभिख्यभास्वद्बुध गुरुंभजे ।
दैवज्ञशर्चित श्रीमान् द्विजराज शिखामणिः । भार – –

End:

वेल्लालकुलवार्धीन्दु पापतिम्मयनिर्मितम् ॥
श्रीमल्लक्ष्मीनृसिंहीयं जीयाद्भुव्येन्दुतारकम् ॥
श्रीशं सूर्यमितिस्तुतमनिरुद्ध पदास्पदम् ।
सुदर्शनं पाञ्चजन्यं वहन्तं मद्गुरं भजे ॥

Colophon:

इति लक्ष्मीनृसिंहीये पापतिम्मयधीमता ।
श्रुङ्गोन्नत्यधिकारोयमष्टमस्समुदाहुतः ॥

358

Sl. No : 32575 **लघुजातकम्** **Ms. No : C. 2885/1**

Beginning :

यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि ।
कुरुतेऽञ्जलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यः ॥
होराशास्त्रं वृत्तैः मया निबद्धं निरीक्ष्य शास्त्राणि ।
यत्तस्याप्यार्याभिः सारमहं प्रवक्ष्यामि ॥

End :

स्थिरे मघादिनक्षत्रं नव दत्वास्थिरादिवत् ।
द्विस्वभावेऽपि मूलाद्यं चरेचह्याश्विनादिवत् ॥
मघादौ नवदानां चेत् मूलादौ दीर्घतां धृतिः ।
नवप्रोत्य तदेव स्यात् इति चाचार्यकं वचः ॥

Colophon :

इति वराहमिहिरकृतंल घुजातकं समाप्तम् ॥

359

Sl. No : 32576 **लघुजातकम्** **Ms. No: C· 1839/7**

Beginning

अथ वसिष्ठोक्तम् —

केन्द्रत्रिकोणधनजायधनेषु सौम्य पापः त्रिषष्ठभवनान्त्यशुभप्रसूनः ।
चन्द्रष्टषष्ठहिबुकान्त्यकळत्रिलग्ने भ्यः प्रोक्तराशिशुभदो मुनयो वदन्ति ॥
रविश्च रविपुत्रश्च भूमिपुत्रश्च केन्द्रगे ।
शिरस्योदयवेळायां जातं यमपुरं व्रजेत् ॥

End :

गुरुक्षेत्रगते चन्द्रे तद्युक्तो वास्य राशिगे ।
तन्द्रेः कार्णनवांशे वा नापरे जात इष्यते ॥

Colophon :

इति श्रीवासिष्ठसंहितायां जातकविचारः ।

360

Sl. No : 32578 **लघुजातकचन्द्रिका** **Ms. No: P. 7473/6**

Beginnig :

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
वीणाधरं महः किञ्चिच्छोणाधरमुपास्महे ॥
फलानि नक्षत्रदशा प्रकारेण विवृण्महे ।
वयं पराशरीं होरामनुसृत्य यथामति ।

End :

फलानि ग्रहचारेण सूययन्ति मनीषिणः ।
को वक्ता तारतम्यस्य तमे × वेदसं विना ॥
यज्ञनारयणाभिख्य यायजूकतनूभुवा ।
श्रीवेङ्कटेश्वराख्येन कृता जातकचन्द्रिका ॥

Colophon :

इति श्रीपराशरहोरासारज्ञ श्रीवेङ्कटेश्वर दैवज्ञविरचितयां लघुजातकचन्द्रिका समाप्ता ॥

361

Sl. No : 32579 लघुजातकटीका **Ms. No: P. 1675/6**

Beginnig :

प्रणिपत्येति ॥ सतामयमाचारो यच्छास्त्रारम्भेष्टदेवतानमस्कारं कुर्वन्ति तदयमध्यावन्तकाचार्यः वराहमिहिरोक्तवरप्रसादाः ज्योतिश्शास्त्रसंग्रहं कृत्वा तदेव पठननिरूपणीकृते संक्षिप्ते स्फुटसंक्षिप्त गणितसंग्रहं कृत्वा होराशास्त्र संक्षिप्तकामो ॥

End :

तात्कालिकग्रहाश्च ततो यथाभिहितविधाना दशाष्टवर्गादिरादेशः कर्तव्यः । अभिहिते फलस्य निर्देशः कर्तव्यः ॥

Colophon :

इति भट्टोत्पलाचार्यविरचितायां शिष्यहिताभिधायां लघुजातकटीकायां नष्टजातकाध्यायः इति लघुजातकटीका समाप्ता ॥

362

Sl. No 32581 लघुजातकटीका **Ms. No : C. 2885/2**

Beginning :

प्रणिपत्य महादेवं भुवनगुरुं दिनकरं च लोकेशम् ।
भट्टोत्पलो लघुतरां जातकटीकां करोति शिष्यहिताम् ॥

+ + पठनभीरूणांकृते संक्षिप्तगणितसंग्रहं कृत्वा होराशास्त्रं संक्षिप्तं वक्तुकामः अशेषविघ्नोपशान्तये भगवन्तं सूर्यमादावेव प्रणमति यस्येति ॥

End :

तात्कालिकात् ग्रहाद्वा ॥ ततो यथाभिहितविधिना दशाष्टकवर्गादिः अभिहितफलस्य निदेशः कर्तव्यः ॥ स्थिरमेघादीति ॥ स्पष्टम् ॥

Colophon :

इति भट्टोत्पलविरचितायां लघुजातकविवृत्तौ शिष्यहिताभिधानायां नष्ट-जातकाध्यायः त्रयोदशः लघुजातकं सम्पूर्णम् ॥

363

Sl· No : 32587 **लघुभास्करीयम्** Ms. No: P. 3898

Beginning :

विश्वस्यात्मा शशाङ्कार्धभूषणो यस्य धीमयः
सोऽनेककिरणो हंसो मानसे नः प्रकाशताम् ॥
अर्थो यो भास्करीयस्य श्रुतोगुरुमुखान्मया ।
अस्मै समन्दमतये संक्षेपेणोपदिश्यते ॥

End :

भागै र्द्वादशभिः सूक्ष्मे व्यग्रे नभसि निर्मले ।
अन्तरांशोत्क्रमाजीवां स्फुटेन्दुव्यासताडिताम् ॥
षण्णगाष्टरसैर्हृत्वा सितमानं पदाधिके ॥

Colophon :

इति लघुभास्करीये सूर्यग्रहणाधिकारो नाम पञ्चमोऽध्यायः ॥

364

SI. No: 32591 **लघुमानसम्** Ms. No: P. 4440/2

Beginning :

प्रकाशादित्यवत्ख्यातो भारद्वजो द्विजोत्तमः ।
लब्धपूर्वं स्फुटोपायं वक्ष्येऽन्यं लघुमानसम् ॥
चैत्रादौ वारसंक्रान्ति तिथ्यकेन्द्रूचसद्भ्रुवान् ।
ज्ञात्वान्यांश्चकवर्षादावजन्म गणयेत्तः ॥

End :

फले शशाङ्कतद्भुत्योर्लि प्राद्यास्वर्णायोर्वधे ।
ऋणं चन्द्रे धनं भुक्ता स्वर्णसाम्यबधेऽन्यथा ॥
व्यर्केन्दोस्तिथितिथ्यर्थे ग्रहाद्भान्यनुपाततः ।
योगश्चन्द्रार्कसंयोगात्तदाद्यन्ता स्वभुक्तितः ॥
नरवाचतै ७२० खखगजै ८०० खङ्ग न मिः ३६० ति ×
योगकरणं चतुर्थाशाद्गतैष्यकम् ॥

Colophon :

इति श्रीमञ्जुलाचार्यकृतौ लघुमानसे स्फुटाध्यायस्तृतीयः ।

365

Sl. No : 32598 लघुमानसव्याख्या Ms. No : B. 583/I

Beginning :

एकंचास्तिवहुधा यद्ब्रह्म परमं प्रणम्य तद्भक्त्या ॥
लघुमानसकरणस्यातनुते विवृतिं प्रशस्तिधरः ॥
अल्पग्रन्थमनल्पं प्रयासरीस्वं परिस्फुटव्यापि ।
समहृग्गणितमतो मे तद्विवृतावस्ति वहुमानः ॥

प्रकाशख्ये पत्तने योसौ भगवनादित्योऽस्ति स यथा सर्वासु दिक्षु व्यातः तद्वदास्मिन्नेव पत्तने आचार्यो मन्जुलनामा तथैव ख्यातः भारद्वाजगोत्रोत्पन्नः द्विजोत्तमः विप्रवरः लघुस्वल्पग्रन्थं अपूर्वस्फुटोपायं अद्भुतापूर्वपरिस्फुटयुक्तिकं अन्यत् अपरं लघुमानसाख्यं करणं वक्ष्ये कथयिष्ये ॥

End :

मानसं नाम ग्रहज्ञानं + येन ज्ञायन्ते तत् षष्ठिससंख्यैः श्लोकैः मया कृतम् अत्र करणे पुरुषः प्रति कन्चुक अपयशोभाजो भवन्ति । अनेन प्रकारेण ग्रहणात् सम्यग्विजानन्ति ते यशोभाजो भवन्तीन्ति सिद्धम् ॥

Colophon :

इति प्रशस्तिधराचार्यकृतायां लघुमानसविवृतौ महापलेन्दुशृङ्गोन्नत्यधिकारोऽष्टमः ॥

इति लघुमानसकरणं सव्याख्यानं समाप्तम् ॥

366

Sl. No :32599 लघुमानसव्याख्या Ms. No: B. 580

Beginning :

अथ लघुमानसग्रन्थो व्याख्यम्यते वाक्यैर्ग्रन्थैश्च । इह शास्त्रे कानि सम्बन्धाभिधेयाधिकारिप्रयोजनानीति इति चेदुच्यन्ते ।

वाच्यवाचकभावसम्बन्धः । वाच्योऽर्थः वाचकः शब्दःकटपयादिलक्षणः तदुपायोपेयात्मलक्षण एवात्रसम्बन्धः । उपायस्तु एतच्छास्त्रम् । अत्रोक्तार्थः उपेयसंज्ञिको भवति ।

End :

श्रीमच्छम्भुवरप्रसादविलसद्वागर्थवान्यल्लय-
श्रीमच्छ्रीधरनन्दनस्सुरमरूप्रख्याद्गुरोः सूर्यतः ।
सम्प्राप्तागमकोविदोऽस्तिरचिता श्टङ्गोन्नती प्रस्फुटं
टीकाकल्पलता च तेन हि मया श्रीमान × विस्तृत ॥

Colophon :

इति श्रींमच्चन्द्रवरलब्धवाग्विभवेन श्रींधराचार्यपुत्रेण श्रीबालादित्दुकपूर्याचार्येण यल्लयार्येण कृतायां श्रींमञ्जलाचार्यकृतलघुमानसकरणव्याख्यायां कल्पलताख्यायां चन्द्रशृङ्गोन्नत्यधिकारोऽष्टमाध्यायः ।

367

Sl. No: 32604 **लम्पाकशास्त्रम्** **Ms. No: P. 4438/1**

Beginning :

नमस्ते शूलहस्ताय चन्द्राधकृतशेखर ।
त्वत्प्रसादात्प्रवक्ष्यामि लम्पाकं लोकभूषणम् ॥

\+ + + +

अण्डाङ्घ्रिकुक्षिवक्षोदोः शिरांस्युक्षादि दाक्षिणी ।
क्रमद्वामे वृश्चिकादीन्व्युत्क्रमात्तानि निर्दिशेत् ॥

End :

आरूढपादा उपरि तद्राशिस्थैश्च पादके ।
नष्टद्रव्यादिपादश्च सद्रव्यादिमुदाहरेत् ॥
पद्मनाभकृतं शास्त्रं शिष्याणां हितकाम्यया ।
द्विषष्टिश्लोकसंक्षिप्तं लम्पाकं लोकभूषणम् ॥

Colophon :

इति लम्पाकशास्त्रं सम्पूर्णम् ॥

368

Sl. No: 32617 **लीलावती** **Ms. No: P 989/2**

Beginning:

प्रीतिं भक्तजनस्य यो जनयतेः विघ्नं विनष्टं स्मृतं
तं वृन्दारकवृन्दवन्दितपदं नत्वा मतङ्गाननम् ।
पाटिं सद्गणितस्य × प्रीतिप्रदां प्रस्फुटाम्
संक्षिप्ताक्षरकोमलामलपदैः लालित्यलीलावतीम् ॥

End:

येषां तु जाति गुणवर्गविद्षतां गी-
शुद्धाखिलव्यवहृती खलु कर्णसिक्ता ।
लीलावतीह सरसोक्तिमुदाहरन्ती
तेषां सदैव सुखम्पदुपैति वृद्धिम् ॥

Colophon:

इति श्रीं भास्कराचार्यविरचिना लीलवती समाप्ता ॥

369

Sl. No: 32630 **लीलावतीविवरणम्** **Ms. No: P. 7622/2**

Beginning:

नत्वा लक्ष्मीशपंचास्यौ हेरम्बं भारतीं रविम् ।
लीलावतीविवरणं वक्ष्ये गुरुकृपावशात् ॥
तत्र तावच्छ्रीमद्भास्कराचार्यः शिष्टाचारपरिपालनार्थेष्टदेवतानतिस्मृति पूर्वकं ग्रन्थकृतिं प्रतिजानीते । प्रीतिमिति ॥

End:

एषा सुजाति गुणवर्गविभूषिताङ्गीं
शद्धाखिलव्यवहृतिः खलु कर्णसक्ता ।
लीलावतीह सरसोक्तिमुदाहरन्ती
दद्यात्सदैव सुखसंम्पदमिष्टवृद्धिम् ॥

Colophon:

इति श्रीमद्भास्कराचार्यविरचिता लीलवती श्रीमहीधरविद्वद्भिरचितदिव्य व्याख्यया सह परिसमाप्ता ॥

370

Sl. No: 32636 कवीन्द्रकण्ठाभरणम् Ms· No: B. 582/

Beginning :

श्रीमद्वागीशलक्ष्मीशगौरीशाद्यखिलामरैः ।
यः पूज्यते मुदा नित्यं तं वन्दे द्विरदाननम् ॥
श्रीरामचन्द्रे राजेन्द्रे राजीवदललोचने ।
नारायणांशे लक्ष्मीशे दशस्यन्दननन्दने ॥

End :

मूलराशिः । ५३४ । तद्घनम् । १५२२७३३०४ ॥
गोदावर्याः तीरे पूगफलान्यङ्गपूगवृक्षाश्च । पूगफलान्य × तेषु क्षोणीगणरामचन्द्रतुल्यानि ॥ ८ ॥ मूलराशिः ॥

Colophon :

इति श्रीमद्बेल्लालकामदेवाचार्यविरचिते कवीन्द्रकण्ठाभरणे गणितशास्त्रे चतुर्थं वर्गमूलपरिकर्म समाप्तमू ॥

(इति १५तमे पत्रे साङ्के वर्तते)

371

Sl. No: 32691 वसन्तराजशकुनम् Ms.:No: P. 9782/2

Beginning :

यत्नतः कृतमयत्नतः कृतं
मंगलं यदुभयात्मकं भवेत् ।
अप्रयत्नविहितं तु मङ्गलं
तत्समस्तमुपदश्यतेऽधुना ॥
कीर्तनाश्रवणतो विलोकनात्
स्पर्शनात्समधिकं यथोत्तरम् ॥
अङ्गनायदधिचन्दनादिकं ॥
स्यात्प्रवासभवनप्रवेशयोः ॥

End :

तक्रं तैलाभिषिक्तं भुजगमभिमुख ग्रन्थितो काष्ठभारं
कार्पासं छिन्ननासं जटमुकुटधरं रक्तमाल्यार्द्रवस्त्रम् ।
रक्तस्त्रीरिक्तकुन्तं द्विजकुलविधवाब्रह्मचार्येकविप्राः
तान् दृष्ट्वाऽथप्रयाणं यदि मरणभयं सर्वकार्येषु नाशम् ॥

Colophon :

इति श्रीवसन्तराजशकुने सदागमार्थशोभने समस्तसत्यकौतुके विचारिते उपश्रुतिप्रकरणं द्वितीयम् ॥

372

SI. No: 32699 वाक्यकरणम् **Ms. No: P. 10056/39**

Beginning :

षष्टिविंशतिगुणितं व्यपगतसंवत्सरेण संमिश्रम् ।
नवशून्याब्धिसमेतम् शकनृपकालं विजानीयात् ॥

\+ \+ \+ \+

End:

रहस्यमेतद्देवानां न देयं यस्य कस्यचित् ।
सुपरीक्षितशिष्याय दातव्यं ज्ञानमुत्तमम् ॥
सदाचार्यपदाम्भोजपूजासन्नद्धचेतनाः ।
सूर्यसिद्धान्तसारज्ञः पालयत्विदम् ॥
इति चन्द्रसूर्यग्रहणं सम्पूर्णम् ॥

— — —

Colophon :

इति श्री वररुचिदैवज्ञविरचिते वाक्यकरणे चन्द्रसूर्योपरागो नाम (चतुर्थ) पञ्चमाध्यायः ॥

373

Sl. No : 32703 **वाक्यकरणव्याख्या** **Ms. No: P. 5265**

Beginning :

श्रीनीलकण्ठांघ्रिनिविष्टचेताः
श्रीसोमदेवानुजिघृक्षयैव ।
विचित्रवाक्यैरचितं पुनश्च
प्रकाशयेऽहं करणं लघीयः ॥

स्वाभीप्सितग्रन्थस्य निष्प्रत्यूह . . . नम्य – नमस्कृत्य करिशैलस्थं

End :

शुद्धमूलमिति ज्ञेयम् ॥
अनन्तनारायणसूनुना पुनः
कवेरकन्यातटवासिना मया ।
प्रकाशिता वाक्यकृतिर्लघीयसी
द्विजेशदेवानुजिघृक्षया लघु ॥

Colophon :

इति विप्रसद्ग्रामवासि- अनन्तरायणपुत्रजम्बूनाथमहाभाष्यभट्टसुन्दरराजेन श्री वाञ्छीजन्मरङ्गनाथपुत्रसोमदेवेन विरचितायां वाक्यकरणलघुदिपिकायां पञ्चमाध्यायः समाप्तः —

374

Sl. No: 32704 **वाक्यकरणव्याख्या** **Ms. No : P. 4099/2**

Beginning :

ज्योतिश्चक्रप्रवर्ताय ज्योतिरूपायभास्वते ।
ज्योतिर्दशाय भक्तेभ्यो ज्योतिश्शास्त्रकृते नमः ।
विचित्रवाक्यैः रचितं पुनश्च प्रकाशयेऽहं करणं लघीयः ॥

स्वाभीप्सितग्रन्थस्य निष्प्रत्यूहपरिसमाप्तये . . . . प्रतिजानीते प्रणम्य करिशैलस्थमिति ॥

End:

चतुर्थाध्यायोक्तप्रकारेण स्वस्वगत्या रविचन्द्रबिम्बे × × × वासि × श्लोक? × मया प्रकाशिता वाक्यकृतिः लघीयसी ॥ द्विजेशदेवानुजिघृक्षया लघु ॥

Colophon :

इति वान्छजन्मश्रीरङ्गनाथपुत्रसोमदेवेन विरचितायां पञ्चमाध्यायः समाप्तः ॥

375

Sl. No 32706 | **वाक्यकरणपञ्चाध्यायीटीका** | **Ms. No : B. 606/2**

Beginning :

श्रीवासुदेवाङ्घ्रिनिविष्टचेताः
श्रीसोमदेवानुजिघृक्षयैव ।
विचित्रवाक्यैरचितं पुनश्च
प्रकाशयेऽहं करणं लघीयः ॥

End :

अनन्तनारायणसूनुना पुनः
कवेकन्यातटवासिना मया ।
प्रकाशि वाक्यकृतिर्लघीयसी
द्विजेशदेवानुजिघृक्षया लघु ॥

Colophon :

इति विप्रसद्ग्रामवास्यनन्तनारायणपुत्रजम्बूनाथमहाभाष्यभट्टसुन्दरराजेन श्रीपाञ्चजन्यरङ्गनाथपुत्रसोमदेवानुग्रहय विरचितायां वाक्यरकणलघुदीपिकायां पञ्चमाध्यायः समाप्तः ।

376

Sl. No: 32719 | **वारकृत्यम्** | **Ms. No: P. 742/5**

Beginning :

राजाभिषेकोत्सवयानसेवा गोवह्निमन्त्रौषधिशस्त्रकर्म ।

सुवर्णताम्रोरगचर्मकाष्ठ
संग्रामधान्यादि रवौ विदध्यात् ॥

End :

लोहाश्मसीसत्रपुशस्त्रदास
पापानृतक्रूरविषासवाद्यम् ।
गृहप्रवेशद्विपबन्धदीक्षा
स्थिरं च कर्मार्कसुते हि कुर्यात् ॥

Colophon :

— -- —

377

Sl· No : 32745 वार्षिकतन्त्रम् **Ms. No: P. 19/a**

Beginning :

आब्रह्मकल्पादि चरन् भचक्रे
नक्षत्रचन्द्रग्रहतारकाणि ।
विभासयत्यात्ममहःप्रभावात्
सोऽह्नांपतिः पातु सदा जगन्ति ॥

य ? × × × ×

स्वस्याभवद्विद्दणनामधेयः
सूनुस्सुधारोचिरिव × र्यः ।
सुवृद्धवानुद्धृतपैतृलोकः
तन्निर्मितं वार्षिकतन्त्रमेतत ॥

End:

तद्बाहुमौर्वीगुणिता महीजात्
साध्यादिदिक्पञ्चककूपचन्द्रैः ।
विक्षेपलिप्ताश्चलब्धाणभक्ताः
गोळक्रमादुत्तरयाम्यकेकाः ॥

Colophon :

इति विद्दणाचार्यविरचिते वार्षिकतन्त्रे उदयास्ताधिकारो नाम सप्तमाऽध्या-
यस्य उदाहरणं समाप्तम् ॥

378

Sl. No: 32747 वार्षिकतन्त्रम् Ms. No: P. 352/2

Beginning :

× × शशिबाहु शिञ्जिनी
संगुणानवभिरिष्टिभाजिता ।
दक्षिणोत्तरगतं तुलाजयोः क्षेपमैन्दवमिदं विनिर्दिशेत् ॥
राहुणोनशशिबाहुशिञ्जिनी ರಾಹುವಿನಿಂದ ಗುಣಾಕಲಿಸಿಕೊಳ್ಳಲ್ಪಟ್ಟಂತ
ಚಂದ್ರನ, ಭಾಹುಶಿಂಜಿನೀ ಭುಜಾಜೀವೆಯಾನಿಕ್ಕಿಕೊಂಡು × ×

End :

दिक्साधनं कर्णवशेन कृत्वा
बिम्बस्य याम्योत्तरतश्च विन्दून् ।
शुक्लान्तयाम्योत्तरबिन्दु संस्पृक्
कुर्याद्धनुः तच्छशिखण्डमावः ॥
ಕರ್ಣವಶೇನ ಕರ್ಣರೇಖೆಯಕಡೆಯಿಂದ ಬಿಂಬಸ್ಯ ಚಂದ್ರಮಂಡಲವೃತ್ತಕ್ಕೆ ×
ಪ್ರತಿಷ್ಠೆಯ ಮಾಡಿದಂತ ಆತನು ಕಂಡ ॥

Colophon :

इति श्री हरिहरभट्टकृते वार्षिकतन्त्रस्य कर्णाटकभाषाव्याख्याने
शृङ्गोन्नत्यध्याययो नाम एकादशोऽध्यायः ॥

379

Sl. No : 32760 वार्षिकोदाहरणम् Ms. No: C. 4700/50

Beginning :

आब्रह्मकल्पादि × × म्भचक्र
नक्षत्रचन्द्रग्रहतारकादीन् ।
विभासयत्यात्ममहप्रभावो
सोऽह्वां पतिः पातु सदा जगन्ति ॥

End :

तस्याभवद्विद्रणनामधेयः
सूनुः सुधारोचिरिव द्वितीयः ।
सुवृत्तवान् उद्धृतयेत्र लोकै
स्तान्निर्मितं वार्षिकतन्त्रमेतत् ॥

Colophon :

— — —

380

Sl. No: 32766 वासिष्ठसिद्धान्तः Ms. No: B. 609/2

Beginning :

वासिष्ठसिद्धान्तप्रारम्भः—

अणिमादिगुणाधारं अप्रतर्क्यमगोचरम् ।
निर्गुणं निरवद्यं तं नमामि ब्रह्म सर्वगम् ॥
स्वारोचिषमनोराद्यं युगादौ मुनिसत्तमः ।
अग्रगण्योऽयमम्मभो माण्डव्यो महतां महान् ॥

End :

षट्खहोरात्रवृत्तानि बद्धा गुरुमुखोदितम् ।
विलोक्य भग्रहादीनि वदेत् सर्वं शुभाशुभम् ॥
य इदं शृणुयात् भक्त्या पठेद्वा सुसमाहितः ।
ग्रहलोकमवाप्नोति दिव्यं निर्मुक्तकिल्बिषः ॥

Colophon :

इति श्रीवासिष्ठसिद्धान्ते गोळाध्यायः पञ्चमः वासिष्ठसिद्धान्तः समाप्तः ॥

381

Sl. No. 32786 विद्यारण्यशकः Ms. No: P. 47/2

Beginning :

(विद्यारण्यशक)

भोगानन्दगणाध्यक्षं कालमाशकवाहनम् ।
जन्मादिविघ्नकर्तारं भजे निजगुरुं सदा ॥
विद्याशङ्करशिष्येण विद्यारण्येन योगिना ।
आख्यातो नृपवंशस्य राज्ञां कालविनिर्णयः ॥

End :

विद्यारण्येन यतिना राज्ञे हरिहराय च ।
तत्सर्वं तन्मुखाच्छ्रुत्वा विद्यारण्यसकाशतः ॥
भारतीकृष्णयतिना नृपाणामावली स्थिता ।
कालसंख्या च कर्णाटक्षितिदेशे यथाक्रमम् ॥
आख्यातो ग्रन्थरूपेण विद्यारण्यस्य चाज्ञया ।

Colophon

लिखितो वेङ्कटेशस्य नामाख्यातेन चेतसा ।
शृङ्गेरिग्राममध्ये तु विद्यारण्यकयोगिनः ।
देवालयस्य वै पश्चात् तथा भागे शिलातले ।
शोभिते लिखितः पश्चात् त्रिषष्टिश्लोक संमितः ।
प्रमाथ्यन्ते यमे भानु शुक्लपक्षे त्रयोदशी ।
गौतमे गोत्रविख्याते शिवनाम्ना स्वमन्त्रिणा ॥ (?)

382

Sl. No: 32827 | **विवाहाध्यायः** | **Ms. No: P. 5690**

Beginning :

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ।
सर्वाश्रमाणामाधारं गृहस्थाश्रममुत्तमम् ।
यतस्तदपि येषायां शीलवत्यां व्यवस्थितम् ।

End :

महापा वैधृत्यो यावत्कालं स्थितिर्भवेत् ।
तावत्कालं त्यजेत्पूर्वं तावत्कालं त्यजेत्परम् ।
एषां स्तदपवादांश्च ज्ञात्वा लग्नबलाबलम् ।
कृत्वा विवाहादि शुभकर्मकुर्याद्विचक्षणः ॥

Colophon :

इति विवाहाध्यायः समाप्तः ।

383

Sl. No : 32830 **विश्वप्रकाशपद्धतिः** Ms. No :A. 675

Beginning :

तत्र सर्वारिष्टशान्ति साधारणत्वात् गोमुखप्रसवमादौ कथ्यते । तत्र गर्गः ॥

प्रणिपत्य रवि वक्ष्ये प्रायश्चित्तमनुस्मरन् ।
सर्वारिष्टविनाशाय यदुक्तं ज्योतिषार्णवे ॥
पित्ररिष्टे सुतारिष्टे मात्ररिष्टे तथैव च ।
प्रायश्चित्तं क(कु)र्यात् तत्तद्दोषस्य शान्तये ।

End :

एवं पञ्चरात्रं त्रिरात्रमेकरात्रं सप्तरात्रं वा पूजाहोमौ कृत्वा पश्चादवभृथं कुर्यात् । विधिरुक्तः । सति निमित्ते संप्रोक्षणविधियुतः प्रतिष्ठे(?) विष्णु कल्पोक्ते कुर्यात् ।

एवमभ्यर्चितो नित्यं शशाङ्कमुकुटो विभुः ।
ऐहिकं मङ्गलं दत्त्वा विष्णुलोकं प्रयच्छति ॥

Colophon :

इति शिवप्रतिष्ठाविधिः ।

384

Sl. No: 32845 **विष्णुकौशलम्** Ms. No: P. 212/4

Beginning :

अजीजनच्छ्रीपुरुषोत्तमो यं
श्री विश्वनाथं श्रुतिकर्ममान्यः ।
विश्वप्रकाशाभिधपद्धतौ तत्
कृतौ समाप्तः खलु पूर्वखण्डः ॥

End :

श्रृणुदेवि प्रवक्ष्यामि चक्रं परमदुर्लभम् ।
कौशलं त्रिजग द्वीपं सदाप्रत्ययकारकम् ॥
कूर्माकारं लिखेच्चक्रं व्योमकारञ्च मध्यमम् ।
अष्टाविंशति ऋक्षाणि सव्यमार्गेण गण्यते ॥

End :

श्रृणुदेवि प्रवक्ष्यामि शक्रं परमदुर्लभम् ।
कौशलं त्रिजगद्वीपं सदाप्रत्ययकारकम् ॥
कूर्माकारं लिखेच्चक्रं व्योमकारकमध्यमम् ।
अष्टाविंशति ऋक्षाणि सव्यमार्गेण गण्यते ॥
मुहूर्तेन विना रात्रौ ग्रहणं च न जायते ।
अस्त्रग्रहणमात्रेण तन्मुहूर्तफलं लभेत् ॥
कमठाख्यं कृतयुगे त्रेतायां कूर्ममुच्यते ।
द्वापरे कुशलं चक्रं कलौ कौशलमुच्यते ॥

Colophon :

इति विष्णुकौशलं संपूर्णम् ॥

385

Sl. No : 32850 **वृद्धगार्ग्यसंहिता** **Ms. No : P. 4665**

Beginning :

अथ प्रवृत्ते प्रभवेऽग्निकोपः
सन्तीतयावैद्यकपाक्षिरोगाः ।
स्तोकं जलं मुञ्चति वारिवाहः
सदा प्रमोदन्ति जनाश्च सर्वे ॥

× + + + +

End:

मध्याह्नात्पूर्वमेव स्याच्छुभकर्मविधिः स्मृतः ।
उदयास्तमराहिद्रे नन्दितौ सर्वकर्मसु ॥
बीजवापे तु पूर्वं स्यादुदयं भास्करस्य वै ।
इति संक्षेपतः प्रोक्तः प्रकीर्णकविधिक्रमाः ॥

Colophon :

इति वृद्धगार्ग्यसंहितायां प्रकीर्णविधिर्नाम पञ्चविंशोऽध्यायः ।

386

Sl. No : 32853 वृद्धयावनम् Ms. No: P. 4880/2

Beginning :

अनभादियोगगळु—

सूर्यं विना रात्रिपतिर्व्ययस्थो
यदा ग्रहस्स्याद्भवोऽथवा स्युः ।
स्यातामथ द्वौ धरमाख्ययोगः
यत्पाद्यते रूपगुणप्रमाणः ॥

End :

रवीन्दुभौमह्मसुरेह्मशुक्र
शनैश्चरा सञ्जनयन्ति मर्त्यम् ।
कर्माश्रिता सत्ययशोनिधानं
महामतिं धर्मविचक्षणं च ॥

Colophon :

इति वृद्धयावने कर्माश्रययोगः

387

Sl. No: 32854 वृद्धवासिष्ठम् Ms. No : P. 5955/17

Beginning :

प्रज्ञाम्भोजसुरासुरेन्द्रनिकरस्फुरर्केन्दुः किरीटोज्वल-
ज्योत्स्नालीढं पदारविन्द . . . . .
यः कुर्वन्निखिलं जगत्यनुदिनं पर्येति कालात्मकः ॥
ज्योतिश्शास्त्रं समग्रं . . . . निर्मलज्ञानचक्षुः ॥

End :

पापसमुत्थस्त्वशुभः
तस्माद्ग्राह्यः सुसाम्यषड्वर्गः ।
शुभकर्मणि सततम्
प्राज्ञः पापान्धयो वर्गः ॥

Colophon :

[इति वृद्धवासिष्ठब्रह्मर्षिविरचितायां ग्रहकूटाध्यायो द्वाविंशः]

388

Sl. No: 32896 **वादिराजप्रश्नः** **Ms. No: B. 745**

Beginning :

ओं रोन्द्रीं वद वद वाग्वादिनी स्वाहेति सिद्धिगणेशमन्त्रेण त्रिवारमभि-मन्त्र्य पूगीफलद्वयं पंक्तिद्वये यथेच्छं स्थाप्य + भो पृच्छक स्थानान्तरं विदेशं गत्वा कार्यं कृत्वा नागमिष्यसि । गमने कार्यसिद्धिः ॥

End :

गर्भे पुत्रसंभवः ; कृष्यादौ प्राशस्त्यम् ; क्रयविक्रयप्राशस्त्यम् ; ग्रामांन्तरगमनतो लाभः ; गमने कार्यसिद्धिः ; विवादे जयः ; सर्व-कार्यसिद्धिः ॥

Colophon :

इति वादिराजप्रश्नः ॥

389

Sl. No: 32935 **शारदादर्पणम्** **Ms. No: P. 7400/1**

Beginning :

पञ्चब्रह्ममयं च × श्रुतिनुतिश्लाघ्यं चतुर्वर्गदं
पञ्चेषोर्दमनं च सप्तभुवनत्राणप्रवीणं परम् ।
एकत्वं गतमद्रिराजसुतयाद्वैतं ध्रुवं ध्यायतां
एकं दैवमजं तमेव जगतामाद्यं ध्रुवं तं भजे ॥
ग्रहचाराद्यनापेकाया × क्षान्कुरुत × जपान् ।
तमिमां केवलज्ञानहोरां संसूचयाम्यहम् ॥

End :

गात्र × षु × विधं निवार्य हस्तिसप्तिसेतुदेहिचाशु सौम्यगीन् तुर्यकाव्यभावभूसभोरुदीपरीतिल × । तानभीरहभ्रमैकहिंस्रता × × (इयानेवग्रन्थः)

Colophon :

इति शारदादर्पणे प्रथमोऽध्यायः ।

390

Sl. No : 32936 शारदाम्बिकम् Ms. No : P. 3162/9

Beginning :

तरणिचन्द्रकुलेजेन्दुकुलोद्भव
त्रिदशमन्त्रिसितासितपन्नगा ।
सकलजन्तुशुभाशुहेतवे
सपदि सन्तु समस्तविभूतये ॥
ग्रहाणां भावफलम् । योजना × देहाधिपः सपापः
षष्ठाष्टमव्यवस्थितेश्च ॥

End :

तथा कुब्जेठमीनोदये च दृष्टे कुजार्किभिः । शशिनिपुमान् । पङ्गु क्रूरग्रहे त्रिकोणे लग्ने च इमेषु बलवत्सुदि शरीरोऽङ्घ्रिबहुलम्माद्विधिपतौ बलयुक्तौ ॥

Colophon:

— — —

391

Sl: No: 32940 शिव नन्दि संवादः Ms.:No: :A 47/16

Beginning :

श्रीरामाय नमः । शिवनन्दिसंवादः प्रारभ्यते । गणेशाय नमः ।
श्रीमन्तं पार्वतीकान्तं सच्चिदानन्दरूपकम् ।
नत्वा स्थित्वा पुरो नन्दी तं पप्रच्छ सदाशिवम् ॥
उमाकान्ताङ्घ्र्यासङ्ग सर्वज्ञ फलदायक ।
कृपया ब्रूहि मे शम्भो कालज्ञानं महत्तरम् ॥

End :

एवं विश्वरूपत्वादिकामरूपविश्वनिर्माणादिमहासिद्धिभिः सह नित्यत्वं यास्यति । अत ऊर्ध्वं वक्तुं मयापि ब्रह्मेन्द्रादिभिः देवैर्वक्तुं न शक्यते शारदादिभिः ।

Colophon

इति श्रीशिवनन्दीश्वरसंवादे अथर्वर्णसारे भविष्यत्कालनिणयो नाम पञ्चमः पटलः ।

392

Sl. No: 32952 शिष्याधीमहातन्त्रम् **Ms. No: B. 608/1**

Beginning :

नत्वा ब्रह्महरित्रिणेत्रदिनकृच्छीतांशुभूनन्दन
प्रालेयांशुसुतेन्द्रमन्त्रिभृगुजच्छायासुतेभाननान् ।
आचार्यार्यभटोदितं सुविषमं व्योमौकसां कर्म यत्-
शिष्याणामभिधीयते तदधुना लल्लेन धीवृद्धिदम् ॥
विज्ञायशास्त्रमलमार्यभटप्रणीत ।
तन्त्राणि यद्यपि कृतानि तदीयशिष्यैः ॥
कर्मक्रमो न खलु सम्यगुदीरितस्तैः ।
कर्म ब्रवीम्यहमतः क्रमशस्तदुक्तम् ॥

End :

पद्मासनस्य मुखजागुणनामाश्रयशुभस्वरूपवती ।
शिष्यधीवृद्धिदं कृत्वा लल्लोहं स्तौमि पार्वतीम् ॥
ब्रह्मविद्यां महामायां ब्रह्मविष्णुशिवार्चिताम् ॥

Colophon :

इति लल्लाचार्यविरचिते शिष्यधीमहातन्त्रे शुद्धग्रहाध्याये बीजवासनाध्याय-
श्चतुर्दश ।

393

Sl. No : 32954 शिष्याधीमहातन्त्रव्याख्या **Ms. No: B. 608/2**

Beginning :

श्रीमत्सुरासुराराध्यचरणाम्बुरुहद्वयाम् ।
चराचरजगद्धात्रीं चण्डिकां प्रणमाम्यहम् ॥
सर्वज्ञनज्ञनार्यणामनुजो मल्लिकार्जुनः ।
प्रवक्ष्ये शिष्यधीतन्त्रटीकां स्पष्टां यथार्थतः ॥
इत्थं वृत्तद्वये प्रथमार्धे ब्रह्मविष्णुमहेश्वरान् – – –

End :

ल्लेन चन्द्रमौळेः पार्वतीवल्लभस्य शम्भोः पादयुगलं संपूज्य आर्यभट-सिद्धान्तार्थवेदिनां तत्तुल्यफलं शिष्यधीवृद्धिदं + ल्लाचार्येण सारस्वतप्रभावात् ग्रन्थकर्तृत्वलक्षणं स्वसामर्थ्यं प्रतिपादितम् ।

Colophon :

इति वंगिदेशसमुद्भवेन कौण्डिन्यान्वयेन महाप्रख्यातेन श्रीमदनन्तनारायणाचार्यपौत्रेण सर्वज्ञनङ्गनार्यानुजेन श्री श्रीशैलमल्लिकार्जुनदेवस्य नाम्ना प्रख्यातमल्लिकार्जुनसूरिणा विरचितं शिष्यधीमहाभाष्यमेतत्सम्पूर्णम् ॥

394

Sl. No. 32956 **शीघ्रबोधः** **Ms. No: A. 698**

Beginning :

सर्वाश्रमाणां मानं गृहस्थाश्रममुत्तमम् ।
यतस्तदपि योषायां शीलवत्यां व्यवस्थितम् ॥
तस्यास्सुशीलालब्धिस्तु सुलग्नवसके खलु ।
पितामहोक्तं संवीक्ष्य लग्नशुद्धिं प्रवच्म्यहम् ॥

End:

इति केतुफलम् ॥

\+ + +

आयुष्मान् स्वातिसंयुक्तो नृपनाशः पशुक्षयः ।
धनुर्मृगे च मेषाद्याः चत्वारः स्युर्निशाबलाः ॥
कर्कटो मिथुनं पञ्च ज्ञेयः षष्ठो यदाबुधैः ।
शीक्षादयस्तु चत्वारः सिंहाद्याः कुम्भ एव च ॥

Colophon:

[इति शीघ्रबाधे काशीनाथविरचिते अर्घप्रकरणं तृतीयम्]

395

Sl. No ; 32976 **शुभाशुभकर्मकालः** Ms. No ; P. 9285

Beginning :

शुचि प्रदेशे तु शुभप्रभावे
सुखोपविष्टः प्रणियम्य वाचः ।
उदङ्मुखः पद्म + खो × प ×
× जायान्मुखतः सुभूमौ ॥
शास्त्रप्रदिष्टं विग × प्रमाणं
त्वचान्वितं स्निग्धमनर्घशुष्कम्

End :

शाम्यन्तार्मितयोरोगाः ग्रहाविघ्नविनायकाः ।
स्वस्यस्तु नृपराष्ट्रेभ्यः स्वस्ति गोब्राह्मणाय च ॥
प्रत्याराात्रिकीम् – कालविधाने—
कार्तिकेमासिचाश्वाभिधाने
शुक्ले पक्षे चाष्टमी द्वादशीषु ।
शुक्ले लग्ने कर्म नीराजनाख्यं
कुर्यात्पुष्टयै मर्त्यवाजिद्विपानम् ॥

Colophon :

— शुभमस्तु —

396

Sl. No 32985 **श्लेषितफलशास्त्रम्** Ms. No : P 3236

Beginning :

प्रत्यूहेश सरस्वतीश गिरिजेश श्रीधरान् हयदान्
नत्वाहं फलदीपिकां च सकलां सर्वार्थचिन्तामणिम् ।
दृष्ट्वा जातकपारिजातमितरग्रन्थानपि श्लेषितं
बोधार्थं सुखतः करोमि सकलैस्सारान् सुसंगृह्य तान् ।
तैः पदाभाधैर्यन्त्रैः जननमयोऽत्र प्रथमतो
विशेषाद्विज्ञेयस्सह विघटिकाभिस्त्वथ तदा ।

गतैः दृक् × व्यत्वं गुणितकरणैः खेचरं गतिं
विदित्वा तद्भावं बलमपि फलं तैः कथयतु ॥

End :

वदेद्दोषफलं नृणां ग्रह × त्काधिकः क्रमात् ।
सर्वतोभद्रचक्रोक्ता शुभवेधाः शुभवहाः ॥
पापवेधा × खकरा गोचरे ताश्च चिन्तयेत् ।
दशापहाराष्टकवर्गगोचरैर्गृहेषु ॥
नृणां विषं स्थितेश्वपि जपैश्च तत्प्रीतिकैरैः ।
च कर्मभिः करोतु शान्तिं वृतदानप × नैः ॥

Colophon :

इति श्लेपिते द्वात्रिंशोऽध्यायः ॥

397

Sl· No : 33012 **षट्पञ्चाशिकहोराविवृत्ति** **Ms. No: P. 4481/2**

Beginning :

केशाजार्कनिशाकरक्षितिजविज्जीवास्फुजित्सूर्यजाम् ।
विघ्नेशं स्वगुरुं प्रणम्य शिरसा देवीं च वागीश्वरीम् ॥
प्रश्नज्ञानविधौ वराहमिहिरांपत्यस्य यद्वस्तुनी ।
लोकानां हितकाम्यया द्विजवरः टीकां करोम्युत्पलः ॥

End :

अंशका जायते द्रव्यं
द्रेक्काणौ तस्करारः स्मृताः ।
राशित्यकालदिग्रे × ×
× जातिश्च लग्नपात् ॥

Colophon :

इति श्री भट्टोत्पलविरचितायां षट्पञ्चाशिकहोराविवृतौ प्रकीर्णाध्यायः सप्तमः ॥

398

Sl. No : 33014 **षट्पञ्चाशद्व्याख्या** **Ms. No: P. 6341/3**

Beginning :

प्रणम्य लोककर्तारं नारायणमहं विभुम्
वक्ष्यामि पृच्छकफलम् संक्षेपेण समुच्चयम् ॥

प्रणिपत्येति ॥ वराहमिहिराचार्यस्यात्मजेन पुत्रेण पृथुयशसा पृथुयशाः इत्यभिधानं यस्य तेन कीदृशेन सद्यशसा सन् श्रेष्ठं यशः यस्य तेन रविं मूर्ध्ना प्रणिपत्य

End :

अधुना प्रश्नकाले लाभलाभ
ज्ञानमह – सौम्ये इति

सौम्यानां अन्य × लग्नस्थिरे यदिवा अस्य सोम्यग्रहस्य – – सौम्य वर्मादयः पापयुताः पापवर्गोदयः सौम्ययुतः । तथा क्लेशो न सिद्धिर्भ ति । तत्राधिक्यानिश्चय इति ॥

Colophon :

— — —

399

Sl. No : 33020 **षट्पञ्चाशिकाव्याख्या** **Ms. No : P. 9347/2**

Beginning :

वराहमिहिरापत्यकृतप्रश्नमहोदधौ ॥
श्रीधरः कुरुते वृत्तिप्लवं लोकानुकम्पया ॥
च्युतिर्विलग्नात् . . . प्रवासी ॥
